कर्त्रधिकरणे आख्यातं कर्तृवाचकमिति शाब्दिकमतं तिरस्कृत्य मीमांसकैः आख्यातार्थो भावनेति सिद्धान्तितम्। अत्राख्यातस्य भावनार्थकत्वानुकूल्येनैव पूर्वपक्षसिद्धान्तयोः मतविन्यासः कृतः। अत एतदधिकरणं मीमांसकानां हृदयभूतम्। परन्तु शाब्दिकैः आख्यातस्य कर्त्रर्थकत्वानुकूल्येनैव तस्याधिकरणस्य व्याख्यानं क्रियते। कौण्डभट्टादिभिर्वैयाकरणैः कर्त्रधिकरणे श्रौतप्रतिषेधस्य क्रतुयुक्तपुरुषार्थत्वं प्रतिपाद्यैव विरतम्, परन्तु तथा स्वीकारे तत्रत्यानां सूत्राणां पूर्वपक्षसिद्धान्तयोश्च समन्वयः कथं स्यादिति नागेशेन विशेषतः प्रदर्शितमिति परिलक्ष्यते। अत्र प्रबन्धे कुमारिलभट्टदिशा नागेशदिशा च कर्त्रधिकरणस्य समन्वयः कथं स्यादित्येव प्रधानतो विचार्यते। प्रसङ्गप्राप्तत्वाद् जञ्जभ्यमानाधिकरणस्यापि विचारः प्रस्तुतः। अत्र एकैकस्यापि विचारबिन्दोः युक्तत्वायुक्तत्वे विद्वांस एव प्रमाणमिति विनिवेद्य अत्रैव विरम्यत इति शम्।

सन्दर्भसूची

[1] तैत्तिरीयब्राह्मणम्-१/५/३/१।

[2] अत्राख्यातशब्दस्य तिङ्-प्रत्ययरूपार्थे व्यवहारो बोध्यः।

[3] जैमिनिसूत्रम्-०३/०४/२८।

[4] तैत्तिरीयब्राह्मणम्-१/५/३/१।

[5] “सत्यं ब्रूयात् प्रियं ब्रूयात् … ॥” इत्यादिः अनृतवर्जनपरः स्मृतिप्रतिषेधः।

[6] जैमिनिसूत्रम्-०३/०४/१९।

[7] दर्शपूर्णमासप्रकरणे पठितमेतद्वाक्यम्।

[8] जैमिनिसूत्रम्-०३/०४/२०।

[9] तैत्तिरीयसंहिता-६/२/५/१।

[10] जैमिनिसूत्रम्-०३/०४/२१।

[11] तैत्तिरीयब्राह्मणम्-३/२/५/४।

[12] तत्रैव-१/५/३/१।

[13] दर्शपूर्णमासप्रकरणे पठितमेतद्वाक्यम्।
[14] जैमिनिसूत्रम्-०३/०४/२०।
[15] तत्रैव-०३/०४/२१।
[16] तत्रैव-०३/०४/२८।
[17] तत्रैव-०३/०४/१९।
[18] तैत्तिरीयब्राह्मणम्-१/५/३/१।
[19] जैमिनिसूत्रम्-०३/०४/२२।
[20] तत्रैव-०३/०४/१९।

सन्दर्भग्रन्थसूची

1. कौण्डभट्टः। (प्रथमप्रकाशनम्, 2019 ई.)। *वैयाकरणसिद्धान्तभूषणम्* (निरञ्जनीव्याख्यया प्रकाशटिप्पण्या च सहितम्, द्वितीयो भागः)। सम्पा. के.वि. रामकृष्णमाचार्यः। Institut Français de Pondichéry, श्रीसोमनाथ-संस्कृत-विश्वविद्यालयः, École Française D'extrême-Orient ।
2. कौण्डभट्टः। (पुनर्मुद्रितसंस्करणम्, २०७८ वि.सं.)। *वैयाकरणभूषणसारः* (प्रभा-दर्पण-व्याख्याद्वयोपेतः)। वाराणसी: चौखम्भा संस्कृत संस्थान।
3. कौण्डभट्टः। (२००९ ई.)। *वैयाकरणभूषणसारः* (काशिका-दर्पण-व्याख्याद्वयोपेतः)। वाराणसी: चौखम्बा सुरभारती प्रकाशन।
4. नागेशभट्टः। (प्रथमसंस्करणम्, 1990 ई.)। *वैयाकरणसिद्धान्तलघुमञ्जूषा* (प्रथमो भागः)। सम्पा. आचार्यरामप्रसादत्रिपाठी। वाराणसी: सम्पूर्णानन्दसंस्कृविश्वविद्यालयः।
5. नागेशभट्टः। (प्रथमसंस्करणम्, 1997 ई.)। *वैयाकरणसिद्धान्तलघुमञ्जूषा* (द्वितीयो भागः)। सम्पा. आचार्यरामप्रसादत्रिपाठी। वाराणसी: सम्पूर्णानन्दसंस्कृविश्वविद्यालयः।
6. पेन्ना, मधुसूदनः। (२०२१ ई.)। *मीमांसादर्शनम्* (शाबरभाष्य-श्लोकवार्तिक-तन्त्रवार्तिक-टुप्टीका-प्रभाटीकासहितम्)। नवदेहली: न्यु भारतीय बुक कर्पोरेशन।
7. लौगाक्षिभास्करः। (२०१७ ई.)। *अर्थसङ्ग्रहः* (अर्थालोक-संस्कृत-टीकासंवलितः)। वाराणसी: चौखम्भा पब्लिशर्स।

पाणिनीयव्याकरणे कर्त्रर्थककृत्प्रत्ययाः भाषावैज्ञानिकमेकं समीक्षणम्

डॉ. सुदीप-मण्डलः

सहायकाध्यापकः, संस्कृतविभागे उत्तरवङ्गविश्वविद्यालयस्य पश्चिमवङ्गस्थस्य

भूमिका

षट्सु वेदाङ्गेषु प्रधानं भवति व्याकरणम्। प्रसिद्धत्वेन गृहीतेषु अष्टसु नवसु वा व्याकरणेषु अन्यतमं भवति पाणिनीयव्याकरणम्। तत्र प्रकृतिप्रत्ययाभ्यां पदानां साधुत्वं प्रतिपाद्यते। तच्च पदं सुबन्ततिङन्तभेदेन द्विधा वर्तते। तद्विधायकं सूत्रं तावत्- "सुप्तिङन्तं पदम्"[1] इति। तयोः तिङन्तपदानां प्रकृतिः भवति धातुः। सुबन्तपदानां प्रकृतिस्तु ङ्यन्तमाबन्तं प्रातिपदिकञ्चेति। तत्र ङीति ङीप् ङीष् ङीन् इत्येतेषां सामान्यरूपम्। आप् इत्यनेनापि टाप् चाप् डाप् इत्येते गृह्यन्ते। प्रातिपदिकस्य तु कृदन्तः तद्धितान्तः समासः केवलविशेष्यश्चेति भेदैः चत्वारः भेदाः विद्यन्ते। प्रतीयते विधीयते इति प्रत्ययः। स च प्रत्ययशब्दः प्रतिपूर्वकात् इण्-धातोः अच्प्रत्यये निष्पद्यते। अतिङ् अर्थात् तिङ्भिन्नः प्रत्ययः कृत्संज्ञकः भवति। धातोः विहिताः तिङ्भिन्नाः प्रत्ययाः कृत्संज्ञकाः इत्यर्थः। तद्विधायकं पाणिनीयसूत्रं तावत्- "कृदतिङ्"[2] इति। ते कृत्प्रत्ययाः कर्तृकर्मभावादिषु अर्थेषु विद्यन्ते। तेषु केवलं कर्त्रर्थकानां कृत्प्रत्ययानामेव भाषावैज्ञानिकमध्ययनं प्रबन्धेऽस्मिन् प्रस्तूयते। भाषायाः विज्ञानमर्थात् विशिष्टरूपेण ज्ञानं भवति भाषाविज्ञानम्। तच्च व्याकरणात्मकं भवति। तस्य विज्ञानदृष्टिमूलकस्य व्याकरणात्मकस्य ज्ञानमेव भाषाविज्ञानमित्युच्यते। यथा चोक्तम्–

भाषायाः विज्ञानं सर्वाङ्गं व्याकरणात्मकम्।

विज्ञानदृष्टिमूलं तत्भाषाविज्ञानमुच्यते।। इति

१. कर्त्रर्थककृत्प्रत्ययानां वैशिष्ट्यम्

कर्तृकर्मभावादिष्वर्थेषु विद्यमानेषु कृत्प्रत्ययेषु केवलं कर्त्रर्थे ये कृत्प्रत्ययाः विधीयन्ते तेषां वैशिष्ट्यानि अत्रालोच्यन्ते। एतेषां कर्त्रर्थकानां कृत्संज्ञकानां प्रत्ययानां प्रकृतिः, अर्थाः, प्रयोगवैचित्र्यं, कर्तृत्वाद्यर्थकत्वं चेत्यादिविषयाः ससूत्रं सोदाहरणञ्च प्रबन्धेऽस्मिन् सरलतया समासेन चालोच्यन्ते।

१.१. क्तवतु– प्रत्ययोऽयं "क्तक्तवतू निष्ठा"[3] इति सूत्रेण निष्ठासंज्ञां प्राप्य "निष्ठा"[4] इति सूत्रेण भूते कर्त्रर्थे च विधीयते। क्तवतुप्रत्ययस्यास्य ककारस्य "लशक्वतद्धिते"[5] इति सूत्रेण,

उकारस्य “उपदेशेऽजनुनासिक इत्”[6] इति सूत्रेण च इत्संज्ञायां “तस्य लोपः”[7] इत्यनेन तयोः ककारोकारयोः लोपे तवत् इत्येव अवशिष्यते। तत्र ककारः कित्कार्यार्थः, उकारश्च उगित्कार्यार्थः इति बोध्यम्। यथा पठ्-धातोः क्तवतु-प्रत्यये अनुबन्धलोपे इडागमे नुमागमे संयोगान्तलोपे उपधादीर्घे च पठितवान् इति रूपं सिद्ध्यति। भूतार्थवृत्तेः धातोः निष्ठाविधानात् क्तवतुप्रत्ययान्तोऽपि भूतकाले एव प्रयुज्यते। तेन रामः वनं गतवान् इत्यस्य रामाभिन्नैककर्तृकवनकर्मकोत्तरदेशसंयोगानुकूलातीतकालिकव्यापारः इत्यर्थः सम्पद्यते। अत्र क्तवतुप्रत्ययेन अतीतकालः सूच्यते। अनेन क्तवतुप्रत्ययान्तेन वाक्यसमाप्तिः अर्थात् क्रियायाः समाप्तिः अपि सूच्यते। अतः रामः वनं गतवान् इत्यत्र पृथक्तया समाप्तिसूचकस्य आसीदित्यादिक्रियापदस्यापेक्षा न भवति। क्वचित् रामः वनं गतवान् आसीदित्यादिरूपेण अस्त्यासीदित्यादीनां प्रयोगोऽपि दृश्यते। तदा तु क्रियापदोक्तकालस्य सापेक्षे क्तवतुप्रत्ययान्तस्यास्य अतीतकालत्वं बोध्यम्। अस्य क्तवतुप्रत्ययान्तस्य सर्वासु विभक्तिषु प्रयोगः सम्भवति। यथा पठितवान् रामः, पठितवन्तं रामं, पठितवता रामेण, पठितवते रामाय, पठितवतः रामात्, पठितवतः रामस्य, पठितवति रामे इत्यादिरूपेण। क्तवतुप्रत्ययान्तस्यास्य भावसप्तम्यामपि प्रयोगः दृश्यते। यथा पठितवत्सु छात्रेषु आचार्यः अगच्छत् इति। “कर्तरि कृत्”[8] इति सूत्रेण कर्त्रर्थे विधीयते कतृविशेषणरूपोऽयं कृत्संज्ञकः क्तवतुप्रत्ययः। अतः कर्तुः लिङ्गवचनानुसारेणैव क्तवतुप्रत्ययान्तस्यापि समानलिङ्गवचनत्वं प्राप्यते। यथा रामः पठितवान्, रामाः पठितवन्तः, सीता पठितवती, सीताः पठितवत्यः, मित्रं पठितवत्, मित्राणि पठितवन्तीति।

१.२. क्त– “क्तक्तवतू निष्ठा”[9] इति सूत्रेण निष्ठासंज्ञकत्वादयं क्तप्रत्ययोऽपि “निष्ठा” इत्यनेन सूत्रेण भूते विधीयते। यद्यपि क्तप्रत्ययः भावकर्मणोः एव भवति तथापि “आदिकर्मणि क्तः कर्तरि च”[10] “गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुह-जीर्यतिभ्यश्च”[11] इति सूत्राभ्यां कर्तरि अपि भवति। क्तप्रत्ययस्यास्य ककारस्य इत्संज्ञायां लोपे च त इत्येव अवशिष्यते। तस्य क्तप्रत्ययस्य कित्त्वात् गुणनिषेधादयः सिद्ध्यन्ति। यथा गम्-धातोः क्तप्रत्यये अनुबन्धलोपे गम् त इति जाते किति क्तप्रत्यये परे “अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति”[12] इत्यनेन अनुनासिकस्य मकारस्य लोपे गत इति रूपं सिद्ध्यति। भूतार्थवृत्तेः धातोः निष्ठाविधानात् क्तप्रत्ययोऽयमपि भूतकाले भवति। तेन रामः विद्यालयं गतः इत्यस्य रामाभिन्नैककर्तृकविद्यालयैककर्मकोत्तरदेश-संयोगानुकूलातीतकालिकव्यापारः इत्यर्थः सम्पद्यते। अर्थात् क्तप्रत्ययेन अतीतकालः सूच्यते। अनेन क्तप्रत्ययान्तेन वाक्यसमाप्तिः अर्थात् क्रियायाः समाप्तिः अपि सूच्यते। अतः रामः वनं गतः इत्यत्र पृथक्तया समाप्तिसूचकस्य आसीदित्यादिक्रियापदस्यापेक्षा न भवति। कर्तृविशेषणरूपोऽयं कृत्संज्ञकः क्तप्रत्ययः कर्त्रर्थे विधीयते। अतः “यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेषस्य, तल्लिङ्गं तद्वचनं सा च विभक्तिर्विशेषणस्यापि” इति नियमात् कर्त्रानुगुण्येन लिङ्गवचनपरिवर्तनं क्तप्रत्ययान्तस्यापि

दृश्यते। यथा रामः गतः, रामाः गताः, सीता गता, सीताः गताः, मित्रं गतम्, मित्राणि गतानि इति। भावसप्तम्यामप्यस्य क्तप्रत्ययान्तस्य प्रयोगः दृश्यते। यथा रामे गते वयं पठामः इति।

१.३. शतृ- "लटः शतृशानचावप्रथमासमानाधिकरणे"[13] इत्यनेन परस्मैपदिनः धातोः वर्तमानकाले कर्त्रर्थकः शतृप्रत्ययोऽयं विधीयते। अस्य शतुः शकारस्य ऋकारस्य च इत्संज्ञायां तयोः लोपे अत् इत्येव अवशिष्यते। तत्र शकारः सार्वधातुकार्थम्, ऋकारश्च उगित्कार्यार्थं प्रयुज्यते। यथा पच्-धातोः शतृप्रत्यये शपि अनुबन्धलोपे पच् अ अत् इति जाते नुमागमे संयोगान्तलोपे प्रक्रियाक्रमे पचन् इति रूपं सिद्ध्यति। यद्यपि शतृप्रत्ययोऽयम् अप्रथमासमानाधिकरणे भवतीति उच्यते। यथा पचन्तं रामं पश्य, पचता रामेण कृतम्, पचते रामाय देहि, पचतः रामात् स्वीकुर्वन्तु, पचतः बालकस्य नाम किम्, पचति रामे सामर्थ्यमस्ति इत्यादिः। तथापि लडिति वर्तमाने लब्धे पुनर्लड्ग्रहणसामर्थ्यात् प्रथमासमानाधिकरणे अपि शतृप्रत्ययः भवति। यथा रामः गच्छन् अस्ति इति। अर्थात् सर्वासु विभक्तिषु अस्य शतृप्रत्ययस्य प्रयोगः सम्भवति। शतृप्रत्ययान्तेनानेन क्रियायाः समाप्तिः न सूच्यते। अतः शतृप्रत्ययान्तघटके वाक्ये "रामः पचन् अस्ति" इत्यादौ क्रियायाः समाप्तिसूचकानाम् अस्त्यासीदित्यादिपदानामपेक्षा भवति। पुनश्च यद्यपि वर्तमानकाले शतृप्रत्ययः विधीयते तथापि क्रियासमाप्तिसूचकैः अस्त्यासीदित्यादिक्रियापदैः यः कालः निर्दिश्यते, शतृप्रत्ययान्तेन स एव कालः बोध्यते। अर्थात् वाक्यसमाप्तिसूचकैः क्रियापदैः ज्ञापितः कालः एव शत्रन्तस्य वर्तमानः कालः इति वर्तमानशब्देनात्र सूच्यते। तेन रामः गच्छन् हसति इत्यत्र हसति इति क्रियापदेन यथा वर्तमानकालिकी हसनक्रिया ज्ञायते तथैव तत्र विद्यमानेन गच्छन् इति शतृप्रत्ययान्तेन वर्तमानकालिकी गमनक्रिया ज्ञायते। ततः रामः गच्छन् हसति इत्यस्य समानकालिकोत्तरदेशसंयोगानुकूलव्यापाराश्रयाभिन्न-रामाभिन्नैककर्तृक-हसनानुकूलवर्तमानकालिकव्यापारः इत्यर्थः सम्पद्यते। पुनश्च रामः गच्छन् अखादीत् इत्यत्र अखादीत् इति क्रियापदेन यथा अतीतकालिकी क्रिया ज्ञायते तथैव तत्र विद्यमानेन गच्छन् इति शत्रन्तेन अतीतकालिकी गमनक्रिया ज्ञायते। तेन रामः गच्छन् अखादत् इत्यस्य समानकालिकोत्तरदेशसंयोगानुकूलव्यापाराश्रयाभिन्न-रामाभिन्नैककर्तृकखादनानुकूलभूतकालिकव्यापारः इत्यर्थः सम्पद्यते। अयमपि "कर्तरि कृत्"[14] इति सूत्रेण कर्त्रर्थे विधीयते। अतः कर्तृविशेषणस्यास्य शतृप्रत्ययान्तस्य कर्त्रानुगुण्येन समानलिङ्गवचनत्वं प्राप्नोति। तेन रामः गच्छन् अस्ति, सीता गच्छन्ती अस्ति, मित्रं गच्छत् अस्ति इत्यादिरूपेण प्रयोगः भवति।

१.४. शानच्- "लटः शतृशानचावप्रथमासमानाधिकरणे"[15] इत्यनेन आत्मनेपदिनः धातोः वर्तमानकाले शानच्प्रत्ययोऽयं विधीयते। अस्य शानचः शकारस्य चकारस्य च इत्संज्ञायां तयोः लोपे आन इत्येव अवशिष्यते। तत्र शकारः सार्वधातुकार्थम्, चकारश्च स्वरार्थं प्रयुज्यते। यथा पच्-धातोः शानचि शपि अनुबन्धलोपे पच् अ आन इति जाते मुगागमे पचमान इति रूपं सिद्ध्यति। अयं शानच्प्रत्ययोऽपि अप्रथमासमानाधिकरणे भवतीति उच्यते। यथा वन्दमानं रामं पश्य,

वन्दमानेन रामेण उक्तम्, वन्दमानाय रामाय देहि, वन्दमानात् रामात् स्वीकुर्वन्तु, वन्दमानस्य बालकस्य नाम किम्, वन्दमाने रामे सामर्थ्यमस्ति इत्यादिः। परन्तु लडिति वर्तमाने लब्धे पुनर्लड्ग्रहणसामर्थ्यात् प्रथमासमानाधिकरणे अपि शानच्प्रत्ययः भवति। यथा कम्पमानः पुरुषः गच्छति इति। अर्थादस्य शानचोऽपि सर्वासु विभक्तिषु प्रयोगः सम्भवति। शानच्प्रत्ययान्तेनानेनापि क्रियायाः समाप्तिः न सूच्यते। अतः शानच्प्रत्ययान्तघटके वाक्ये "रामः वन्दमानः अस्ति" इत्यादौ क्रियायाः समाप्तिसूचकानाम् अस्त्यासीदित्यादिपदानामपेक्षा भवति। यद्यपि वर्तमानकाले शानच्प्रत्ययः विधीयते तथापि क्रियासमाप्तिसूचकैः अस्त्यासीदित्यादिपदैः यः कालः निर्दिश्यते, शानच्प्रत्ययान्तेनापि स एव कालः बोध्यते। अर्थात् अत्रापि वाक्यसमाप्तिसूचकैः क्रियापदैः ज्ञापितः कालः एव शानजान्तस्य वर्तमानः कालः इति वर्तमानशब्देन सूच्यते। तेन रामः वन्दमानः अस्ति इत्यादौ अस्तिक्रियासापेक्षे वन्दमानः इति शानच्प्रत्ययान्तस्य स्तुत्यनुकूलक्रिया वर्तमानकालिकी इति सिद्ध्यति। ततः रामः वन्दमानः अस्ति इत्यस्य स्तुत्यनुकूलव्यापाराश्रयरामाभिन्नैककर्तृकसत्तानुकूल-वर्तमानकालिकव्यापारः इत्यर्थः सम्पद्यते। पुनश्च रामः वन्दमानः आसीदित्यत्र आसीदिति अतीतकालिकक्रियापदसापेक्षे वन्दमानः इति शानजान्तस्य स्तुत्यनुकूलक्रिया अतीतकालिकी इत्येव ज्ञायते। तेन रामः वन्दमानः आसीदित्यस्य स्तुत्यनुकूलव्यापाराश्रयरामाभिन्नैककर्तृक-सत्तानुकूलातीतकालिकव्यापारः इत्यर्थः सम्पद्यते। अयमपि "कर्तरि कृत्" इति सूत्रेण कर्त्रर्थे विधीयते। अतः कर्तृविशेषणस्यास्य शानच्प्रत्ययान्तस्य कर्त्रानुगुण्येन समानलिङ्गवचनत्वं प्राप्नोति। तेन रामः कम्पमानः अस्ति, सीता कम्पमाना अस्ति, मित्रं कम्पमानम् अस्ति इत्यादिरूपेण प्रयोगः भवति। कर्मणि शानच् तु सर्वेभ्यः धातुभ्य अर्थात् आत्मनेपदिभ्यः परस्मैपदिभ्यः च धातुभ्यः भवति। स च कर्मणः एव विशेषणमिति ज्ञेयम्।

१.५. कानच्- "लिटः कानज्वा"[16] इत्यनेन छन्दसि परोक्षभूतकाले लिटः स्थाने कर्त्रर्थकः कानच्प्रत्ययोऽयं विधीयते। छन्दसि अनद्यतनपरोक्षत्वं न विवक्षितम्। अतः छन्दसि भूतसामान्ये लिटः कानच् भवतीत्यर्थः सम्पद्यते। प्रत्ययान्तेनानेन भूतकालः एव सूच्यते। तत्र कानजान्तस्यातीतकालत्वं वाक्ये प्रयुज्यमानायाः मूलक्रियायाः सापेक्षे इति बोध्यम्। अस्य कानचः ककारचकारयोः इत्संज्ञायां तयोः लोपे आन इत्येव अवशिष्यते। तत्र कित्करणं गुणनिषेधादिकार्यार्थम्, चित्करणं तु अन्तोदात्तस्वरार्थमिति बोध्यम्। यथा चिधातोः लिटि धातोः द्वित्वे अभ्यासादुत्तरस्य चकारस्य कुत्वे यणादेशे चिक्यान इति रूपं सिद्ध्यति। ततः ब्राह्मणः अग्निं चिक्यानः इत्यस्य ब्राह्मणाभिन्नैककर्तृकाग्निकर्मकचयनानुकूलातीतकालिकव्यापारः इत्यर्थः सम्पद्यते। अनेन कानच्प्रत्ययेन असमापिका क्रिया उच्यते। अतः क्रियासमाप्त्यर्थं पृथक्तया अस्त्यासीदित्यादिपदानि वाक्ये उपयुज्यन्ते। अस्य कानचः सर्वासु विभक्तिषु प्रयोगः सम्भवति। यथा अग्निं चिक्यानं ब्राह्मणं पश्य, अग्निं चिक्यानेन ब्राह्मणेन मन्त्रः पठ्यते, चिक्यानाय ब्राह्मणाय देहि, चिक्यानात् ब्राह्मणात्, चिक्यानस्य ब्राह्मणस्य, चिक्याने ब्राह्मणे इत्यादयः। ब्राह्मणे अग्निं चिक्याने सति यज्ञारम्भः भवेदित्यादिरूपेण भावसप्तम्यामपि अप्यस्य कानचः प्रयोगः सम्भवति।

पुनश्च "कर्तरि कृत्" इति सूत्रेण कर्त्रर्थे अयं कानच् भवति। अतः कर्तृविशेषणत्वात् कृत्संज्ञकस्यास्य कानच्प्रत्ययान्तस्य कर्त्रानुगुण्येन समानलिङ्गवचनत्वं प्राप्नोति। यथा अग्निं चिक्यानः ब्राह्मणः, चिक्यानाः ब्राह्मणाः, चिक्याना माता, चिक्यानाः मातरः, चिक्यानं मित्रम्, चिक्यानानि मित्राणि इति।

१.६. क्वसु– "क्वसुश्च"[17] इत्यनेन सूत्रेण छन्दसि भूतकाले कर्त्रर्थकः क्वसुः भवति। छन्दसि अनद्यतनपरोक्षत्वाभावात् भूतसामान्ये लिटः क्वसुः भवतीत्यर्थः सम्पद्यते। अयं यथा छन्दसि भवति तथा भाषायामपि "भाषायां सदवसश्रुवः"[18] इति सूत्रेण सदादिभ्यः विकल्पेन भवति। तत्र क्वसोः ककारस्य उकारस्य च इत्संज्ञायाम्, तयोः लोपे वस् इत्येव अवशिष्यते। कित्करणं गुणनिषेधादिकार्यार्थम्, उगित्करणं नुमर्थमिति बोध्यम्। यथा पाधातोः लिटि, लिटः क्वस्वादेशे इटि आकारलोपे द्वित्वे अभ्यासकार्ये नुमागमे संयोगान्तलोपे उपधादीर्घे पपिवान् इति रूपं सिद्ध्यति। भूतसामान्ये विधानात् अनेन क्वस्वन्तेन भूतकालः एव सूच्यते। तेन रामः पपिवान् इत्यस्यार्थः रामाभिन्नैककर्तृकपानानुकूलातीतकालिकव्यापारः इत्यर्थः सम्पद्यते। अनेन क्वसुप्रत्ययान्तेन क्रियायाः समाप्तिः अपि सूच्यते। अतः रामः पपिवान् इत्यत्र पृथक्तया समाप्तिसूचकस्य आसीदित्यादिक्रियापदस्यापेक्षा न भवति। क्वचित् रामः पपिवान् आसीदित्यादिरूपेण अस्त्यासीदित्यादीनां प्रयोगोऽपि दृश्यते। तदा तु क्रियापदोक्तकालसापेक्षे अस्य क्वसुप्रत्ययान्तस्यातीतकालत्वमिति बोध्यम्। अस्य क्वसुप्रत्ययान्तस्य सर्वासु विभक्तिष्वपि प्रयोगः सम्भवति। भावसप्तम्यामपि अस्य प्रयोगः सम्भवति। कतृविशेषणरूपोऽयं कृत्संज्ञकः क्वसुप्रत्ययः "कर्तरि कृत्" इति सूत्रेण कर्त्रर्थे विधीयते। अतः विशेषणरूपस्य क्वसुप्रत्ययान्तस्य विशेष्यानुसारेण समानलिङ्गवचनत्वं प्राप्नोति। यथा रामः पपिवान्, रामाः पपिवांसः, सीता पप्युषी, मित्रं पपिवः इति।

१.७. शानन्– "पूङ्यजोः शानन्"[19] इत्यनेन कृत्संज्ञकोऽयं शानन्प्रत्ययः पूङ्यज्धातुभ्यां कर्त्रर्थे विधीयते। "वर्तमाने लट्"[20] इत्यतः वर्तमाने इत्यस्यानुवृत्त्या लाभात् प्रत्ययोऽयं वर्तमानकाले भवति। अत्रापि वर्तमानशब्देन वाक्यसमाप्तिसूचकैः क्रियापदैः ज्ञापितः कालः एव शानन्प्रत्ययान्तस्य वर्तमानः कालः इति सूच्यते। पुनश्च सूत्रेऽस्मिन् लटः निवृत्त्या लादेशत्वाभावात् शाननः स्वतन्त्रत्वं सिद्ध्यति। तेन पवते यजते इत्यादयोऽपि स्यात्। ततः "कर्तरि कृत्" इत्यनेन कर्तरि एवायं प्रत्ययः विधीयते, न तु भावकर्मणोः। शाननोऽस्य शकारस्य नकारस्य च इत्संज्ञायां तयोः लोपे आन इत्येव तिष्ठति। अत्र शकारः सार्वधातुकसंज्ञार्थं, नकारः आद्युदात्तस्वरार्थं प्रयुज्यते। यथा पूङ् पवने इति धातोः शानने शपि अनुबन्धलोपे पू अ आन इति जाते गुणे अवादेशे मुगागमे पवमान इति रूपं सिद्ध्यति। ततः ब्राह्मणः सोमं पवमानः अस्ति इत्यस्यार्थः भवति सोमकर्मकपवनानुकूलवर्तमानकालिक-व्यापाराश्रयब्राह्मणाभिन्नैककर्तृकसत्तानुकूलवर्तमानकालिकव्यापारः इति। अनेन शानन्प्रत्ययेन क्रियायाः समाप्तिः न भवति। अतः समाप्तिसूचकानामस्त्यादीनां प्रयोगः दृश्यते। तैः समाप्तिसूचकैः

पदैः उक्तः कालः शाननोऽपि कालः इति ज्ञेयम्। सर्वासु विभक्तिषु चास्य प्रयोगः सम्भवति। यथा सोमं पवमानं ब्राह्मणं, सोमं पवमानेन ब्राह्मणेन, सोमं पवमानाय ब्राह्मणाय, सोमं पवमानात् ब्राह्मणात्, सोमं पवमानस्य ब्राह्मणस्य, सोमं पवमाने ब्राह्मणे इत्यादयः। ब्राह्मणे सोमं पवमाने यज्ञारम्भः स्यादित्यादिरूपेण भावसप्तम्यामपि अस्य प्रयोगः भवति। कर्तृविशेषणत्वात् शाननोऽस्य कर्त्रनुसारेण समानलिङ्गवचनत्वं प्राप्नोति। यथा पवमानः ब्राह्मणः, पवमानाः ब्राह्मणाः, पवमाना व्यक्तिः, पवमानाः व्यक्तयः, पवमानं मित्रं पवमानानि मित्राणि इति। शानच्शाननोः रूपभेदाभावेऽपि पार्थक्यं तु अस्त्येव। यथा शानचा चित्स्वरः शानना च नित्स्वरः सिद्ध्यति। पुनः शानच् धातुसामान्यात् विधीयते। परन्तु शानन् पूङ्यजोः एव विधीयते न तु अन्यत्र।

१.८. चानश्- कृत्संज्ञकोऽयं प्रत्ययः "ताच्छील्यवयोवचनशक्तिषु चानश्"[21] इति सूत्रेण ताच्छील्यादिष्वर्थेषु वर्तमानात् धातोः कर्त्रर्थे भवति। अत्रापि वर्तमाने इत्यस्य अनुवृत्त्या लाभात् वर्तमानकाले एवायं भवति। अत्रापि वर्तमानशब्देन वाक्यसमाप्तिसूचकैः क्रियापदैः ज्ञापितः कालः एव चानशः वर्तमानः कालः इति सूच्यते। पुनः अत्र लटः निवृत्त्या लादेशत्वाभावात् अस्यापि स्वतन्त्रत्वं सिद्ध्यति। तेन परस्मैपदिभ्यः धातुभ्योऽप्ययं चानश् विधीयते। अस्य चानशः चकारस्य शकारस्य च इत्संज्ञायां लोपे आन इत्येव अवशिष्यते। अत्र चकारः चित्स्वरार्थः, शकारश्च सार्वधातुकार्थः वर्तते। यथा भुञ्जधातोः चानशि अनुबन्धलोपे भुञ्जान इति रूपं सिद्ध्यति। अनेन चानशा वाक्यं न समाप्यते। अतः वाक्यसमाप्त्यर्थमस्त्यादीनां प्रयोगः अपेक्षते। यथा भोगं भुञ्जानः अस्तीति। ततः मनुष्यः भोगं भुञ्जानः अस्तीत्यस्यार्थः भवति भोगसम्पादनानुकूलवर्तमानकालिक-व्यापाराश्रयमनुष्याभिन्नैककर्तृकसत्तानुकूलवर्तमानकालिकव्यापारः इति। अस्यापि भुञ्जानं मनुष्यं, भुञ्जानेन मनुष्येण, भुञ्जानाय मनुष्याय, भुञ्जानात् मनुष्यात्, भुञ्जानस्य मनुष्यस्य, भुञ्जाने मनुष्ये इत्यादिरूपेण सर्वासु विभक्तिषु प्रयोगः दृश्यते । भावसप्तम्यामपि अस्य प्रयोगः सम्भवति। यथा भोगं भुञ्जाने मनुष्ये कथं मोक्षः इति। अस्य लादेशत्वाभावात् "कर्तरि कृत्" इत्यनेन कर्तरि एवास्य विधानम्। तेन कर्त्रानुगुण्येन समानलिङ्गवचनत्वं सिद्ध्यति। यथा भोगं भुञ्जानः मनुष्यः, भुञ्जानाः मनुष्याः, भुञ्जाना नारी, भुञ्जानाः नार्यः, भुञ्जानं मित्रं, भुञ्जानानि मित्राणि इति। शानच्चानशोः समानरूपत्वेऽपि फलभेदस्तु अस्त्येव। यथा शानच् आत्मनेपदिभ्यः धातुभ्यः विधीयते, परन्तु चानश् ताच्छील्यादिष्वर्थेषु विद्यमानेभ्यः परस्मैपदिभ्योऽपि विधीयते।

१.९. ण्वुल्– कृत्संज्ञकोऽयं प्रत्ययः "ण्वुल्तृचौ"[22] इति सूत्रेण सर्वेभ्यः धातुभ्यः कर्त्रर्थे विधीयते। अस्य ण्वुलः णकारस्य लकारस्य च इत्संज्ञायां तयोः लोपे वु इत्येव अवशिष्यते। ण्वुलि णकारः वृद्ध्यर्थकः लकारश्च स्वरार्थकः वर्तते। यथा पच्-धातोः ण्वुलि अनुबन्धलोपे पच् वु इति जाते "युवोरणाकौ"[23] इति सूत्रेण वोः अक् इत्यादेशे पाचकः इति रूपं सिद्ध्यति। "कर्तरि कृत्" इति सूत्रेण कर्त्रर्थे अयं ण्वुल् भवति। तेन ण्वुलः अर्थः भवति कर्ता। ततः पाचकः इत्यस्यार्थः पाककर्ता इत्यर्थः सम्पद्यते। अनेन न कोऽपि कालः सूच्यते। अतः वाक्यसमाप्त्यर्थं पृथक्तया

अस्त्यादिक्रियापदानामपेक्षा भवति। यद्यपि कालनिरपेक्षोऽयं कृत्संज्ञकः ण्वुल् प्रत्ययः तथापि ण्वुल्तृचोः वर्तमानकालादन्यत्र न प्रयोगः इति भाष्यकारेणोक्तम्। तत्र वर्तमानशब्देन वाक्यस्थैः क्रियापदैः उक्तः कालः एव सूच्यते। अस्य ण्वुल्प्रत्ययस्य सर्वासु विभक्तिषु प्रयोगः सम्भवति। यथा पाचकः गच्छति, पाचकं पश्य, पाचकेन कृतम्, पाचकाय देहि, पाचकात् स्वीकरोतु, पाचकस्य वस्तु, पाचके बुद्धिः अस्ति इत्यादयः। पाचके आगते रन्धनक्रिया आरब्धा इत्यादिरूपेण भावसप्तम्यामपि अस्य प्रयोगः सम्भवति। कर्तृविशेषणत्वात् कर्तुः लिङ्गवचनानुसारेण अस्य ण्वुलोऽपि समानलिङ्गवचनत्वं प्राप्नोति। यथा पाचकः रामः, पाचकाः रामाः, पाचिका नारी,पाचिकाः नार्यः इत्यादयः। पाचकः रामः आगच्छति इत्यादिषु ण्वुल्प्रत्ययान्तस्य यथा विशेषणरूपेण प्रयोगः दृश्यते तथा क्वचित् पाचकः गच्छति इत्यादिषु विशेष्यरूपेणापि अस्य ण्वुल्प्रत्ययान्तस्य प्रयोगः दृश्यते।

१.१०. तृच्– अयं कर्त्रर्थकः कृत्प्रत्ययोऽपि "ण्वुल्तृचौ"[24] इत्यनेन धातोः विधीयते। अस्य तृचः चकारस्य इत्संज्ञायां लोपे तृ इत्येव अवशिष्यते। स च चकारः "तुश्छन्दसि"[25] इत्यादौ सामान्यग्रहणार्थं प्रयुज्यते, न तु अन्तोदात्तस्वरार्थम्। यतो हि "आद्युदात्तश्च"[26] इत्यनेनैव स्वरः सिद्ध्यतति। यथा हृधातोः तृचि अनुबन्धलोपे गुणे रपरत्वे विभक्तिकार्ये हर्ता इति रूपम्। अत्र विद्यमानस्य तृच्प्रत्ययस्यार्थः कर्ता। अतः हर्ता इत्यस्य हरणकर्ता इत्यर्थः। यद्यपि अनेन कोऽपि कालः न सूच्यते तथापि वर्तमानकाले एव ण्वुल्तृचोः प्रयोगः इति भाष्यम्। अत्रापि वर्तमानशब्देन वाक्यस्थैः क्रियापदैः उक्तः कालः एव सूच्यते। अस्य तृचः सर्वासु विभक्तिष्वपि प्रयोगः दृश्यते। यथा कर्ता कार्यं करोति, कर्तारं पश्य, कर्त्रा कार्यं कृतम्, कर्त्रे देहि, कर्तुः चाकलेहं स्वीकरोतु, कर्तुः हस्तात् पतितम्, कर्तरि ज्ञानमस्ति इत्यादयः। भावसप्तम्यामपि अस्य प्रयोगः सम्भवति। यथा कर्तरि आगते द्वारमुद्धाटयतु इति। अयं तृच् "कर्तरि कृत्" इति सूत्रेण कर्त्रर्थे विधीयते। अतः कर्तृविशेषणत्वात् कर्तुः लिङ्गवचनानुसारेण तृजन्तस्यापि समानलिङ्गवचनत्वं प्राप्नोति। यथा कर्ता आगच्छति, कर्तारः आगच्छन्ति, कर्त्री आगच्छति, कर्त्र्यः आगच्छन्ति इत्यादयः। तृजन्तस्य क्वचित् विशेष्यरूपेण क्वचित् विशेषणरूपेण प्रयोगः सम्भवति। यथा कर्ता रामः आगच्छति इत्यादिषु तृजन्तस्य रामविशेषणरूपेण प्रयोगः। परन्तु कर्ता आगच्छति इत्यादिषु तु तृजन्तस्य विशेष्यरूपेण प्रयोगः दृश्यते।

१.११. ल्यु– "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः"[27] इति सूत्रेणायं कृत्संज्ञकः ल्युः प्रत्ययः भवति। द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकं सम्बध्यते इति नियमात् नन्द्यादिभ्यः ल्युः इति सिद्ध्यति। धातुपाठे सन्निविष्टानां नन्द्यादीनां नात्र ग्रहणम्। परन्तु वृत्तौ पठितेषु नन्दन रमण इत्येवमादिषु प्रातिपदिकेषु अपोद्धृत्य ये प्रकृतयः दृश्यन्ते, तेषां नन्द्यादीनामेवात्र ग्रहणम्। तत्प्रयोजनं तु संज्ञाविशिष्टे साधुत्वम्। तेभ्यः नन्द्यादिगणे विद्यमानेभ्यः ण्यन्तेभ्यः अण्यन्तेभ्यः वा धातुभ्यः ल्युप्रत्ययः भवति। तस्य ल्युप्रत्ययस्य लकारस्य इत्संज्ञायां लोपे यु इत्येव अवशिष्यते। तत्र लित्करणं स्वरार्थमेव। यथा ण्यन्तात् टुनदि इति धातोः प्रकृतसूत्रेण ल्युप्रत्यये अनुबन्धलोपे णिचः

लोपे नन्द् यु इति जाते योः अनादेशे नन्दन इति रूपं सिद्ध्यति। प्रत्ययोऽयं "कर्तरि कृत्" इत्यनेन कर्त्रर्थे विधीयते। तेन नन्दन इत्यस्य समृद्धकर्ता इत्यर्थः। अत एव वृत्तौ नन्दयतीति नन्दनः इत्युक्तम्। ल्युप्रत्ययेनानेन क्रियासमाप्तिः न दृश्यते। अतः क्रियायाः समाप्त्यर्थं ल्युप्रत्ययघटके वाक्ये अस्त्यादीनां क्रियापदानामपेक्षा भवति। सर्वासु प्रथमादिषु विभक्तिषु नन्दनः पश्यति, नन्दनं पश्य, नन्दनेन पृष्ठम्, नन्दनाय देहि, नन्दनात् प्राप्तम्, नन्दनस्य लावण्यं, नन्दने कला इत्यादिरूपेण ल्युप्रत्ययान्तस्यास्य प्रयोगः सम्भवति। नन्दने आगते अस्माकं समृद्धिः इत्यादिरूपेण भावसप्तम्यामपि अस्य प्रयोगः सम्भवति। कर्तृविशेषणत्वात् कर्तुः लिङ्गवचनानुसारेण अस्य ल्युप्रत्ययान्तस्यापि समानलिङ्गवचनत्वं प्राप्नोति। यथा लवणः सूपः, लवणा मृत्तिका, लवणं जलमित्यादयः।

१.१२. णिनि– "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः"[28] इत्यनेन कृत्संज्ञकः णिनिप्रत्ययोऽयं विधीयते। द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकं सम्बध्यते इति नियमात् ग्रह्यादिभ्यः णिनिः सिद्ध्यति। अत्रापि संज्ञाविशिष्टे साधुत्वलाभाय वृत्तौ पठितानां ग्रह्यादीनामेव ग्रहणम्, न तु धातुपाठे सन्निविष्टानां ग्रह्यादीनां ग्रहणम्। अतः तेभ्यः ग्रह्यादिगणे विद्यमानेभ्यः धातुभ्यः णिनिप्रत्ययः भवति। तस्य णिनेः णकारस्य इकारस्य च इत्संज्ञायां तयोः लोपे इन् इत्येव अवशिष्यते। तत्र णित्करणं वृद्ध्यादिणित्कार्यार्थम्। यथा मन्त्रयति इत्यर्थे मन्त्र् इति धातोः प्रकृतसूत्रेण णिनिप्रत्यये अनुबन्धलोपे णिचः लोपे च मन्त्रिन् इति जाते प्रक्रियाक्रमे मन्त्री इति रूपं सिद्ध्यति। अयं णिनिः अपि "कर्तरि कृत्" इति सूत्रेण कर्त्रर्थे विधीयते। ततः मन्त्री इत्यस्य मन्त्रणकर्ता इत्यर्थः सम्पद्यते। अनेन णिनिप्रत्ययेन क्रिया नोच्यते। अतः क्रियायाः समाप्त्यर्थं णिनिप्रत्ययघटके वाक्ये अस्त्यादीनां क्रियापदानामपेक्षा भवति। सर्वासु प्रथमादिषु विभक्तिषु मन्त्री गच्छति, मन्त्रिणं पश्य, मन्त्रिणा कृतम्, मन्त्रिणे ददातु, मन्त्रिणः ज्ञानं लब्धम्, मन्त्रिणः चातुर्यम्, मन्त्रिणि विचक्षणता इत्यादिरूपेण णिनिप्रत्ययान्तस्यास्य प्रयोगः सम्भवति। मन्त्रिणि विचिन्त्यमाने अस्माकं सौविध्यम् इत्यादिरूपेण भावसप्तम्यामपि अस्य प्रयोगः सम्भवति। कर्तृविशेषणत्वात् कर्तुः लिङ्गवचनानुसारेण अस्य णिनिप्रत्ययान्तस्यापि समानलिङ्गवचनत्वं प्राप्नोति। यथा मन्त्री महोदयः, मन्त्रिनः महोदयाः, मन्त्रिणी महोदया, मन्त्रिण्यः महोदयाः, मन्त्रिन् मित्रम् इत्यादयः।

१.१३.अच्- "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः"[29] इत्यनेनायं कर्त्रर्थकः कृत्संज्ञकः अच्प्रत्ययः विधीयते। प्रत्ययोऽयं पचाद्याकृतिगणे विद्यमानेभ्यः धातुभ्यः विधीयते। अचोऽस्य चकारस्य इत्संज्ञायां लोपे अ इत्येवावशिष्यते। तत्र चित्स्वरार्थं चकारः प्रत्यये उपयुज्यते। यथा पचतीति विग्रहे पच्-धातोः प्रकृतसूत्रेण अचि अनुबन्धलोपे पच् अ इति जाते प्रक्रियाक्रमे पचः इति रूपं सिद्ध्यति। "कर्तरि कृत्" इति सूत्रेण कर्त्रर्थे कृत्संज्ञक अच्प्रत्ययोऽयं विधीयते। ततः पचः इत्यस्य पाककर्ता इत्यर्थः सम्पद्यते। अनेनापि अच्प्रत्ययेन क्रिया नोच्यते। अतः क्रियायाः समाप्त्यर्थम् अच्प्रत्ययघटके वाक्ये अस्त्यादीनां क्रियापदानामपेक्षा भवति। पचः आगच्छति, पचं पश्य, पचेन सम्पादितम्, पचाय देहि, पचात् स्वीकरोतु, पचस्य वस्तु, पचे रन्धनकला वर्तते

इत्यादिरूपेण सर्वासु प्रथमादिषु विभक्तिषु अच्प्रत्ययान्तस्यास्य प्रयोगः सम्भवति। पचे उक्ते रन्धनप्रक्रिया आरभ्यते इत्यादिरूपेण भावसप्तम्यामपि अस्य प्रयोगः सम्भवति। कर्तृविशेषणत्वात् कर्तुः लिङ्गवचनानुसारेण अस्य अच्प्रत्ययान्तस्यापि समानलिङ्गवचनत्वं प्राप्नोति। यथा पचः रामः, पचाः रामाः, पचा बालिका, पचाः बालिकाः, पचं मित्रं, पचानि मित्राणि इत्यादयः।

१.१४. ष्वुन्– "शिल्पिनि ष्वुन्"[30] इति सूत्रेण कर्त्रर्थकः कृत्प्रत्ययोऽयं विधीयते। शिल्पं भवति क्रियाकौशलम्। तस्मिन् शिल्पवति कर्तरि धातोः ष्वुन् स्यात्। ष्वुन् प्रत्ययस्य षकारस्य नकारस्य च इत्संज्ञायां तयोः लोपे वु इत्येव अवशिष्यते। ततः"युवोरनाकौ" इति सूत्रेण वोः अक् इत्यादेशः प्राप्नोति। तत्र नकारः आद्युदात्तार्थं षकारश्च ङीषर्थं प्रयुज्यते। यथा नृत्धातोः प्रकृतसूत्रेण ष्वुनि अनुबन्धलोपे अकादेशे गुणे रपरत्वे नर्तकः इति रूपम्। कृत्संज्ञकोऽयं ष्वुन्प्रत्ययः "कर्तरि कृत्" इति सूत्रेण कर्त्रर्थे विधीयते। अतः अनेन ष्वुन्प्रत्ययान्तेन कर्त्रर्थः प्रतीयते। एवं नर्तकः इत्यस्य नृत्यकर्ता इत्यर्थः सम्पद्यते। अनेन ष्वुन्प्रत्ययान्तेन क्रिया न प्रतिपाद्यते। अतः वाक्यसमाप्त्यर्थम् अस्त्यासीदित्यादीनां प्रयोगोऽपेक्षते। तत्र समाप्तिसूचकेन क्रियापदेन य कालः उच्यते, स एव ष्वुन्प्रत्ययान्तस्य कालः इति बोध्यम्। ष्वुन्प्रत्ययान्तस्यास्य सर्वासु प्रथमादिविभक्तिषु नर्तकः आगच्छति, नर्तकं पश्य, नर्तकेन दर्शितम्, नर्तकाय देहि, नर्तकात् पतितं भूषणम्, नर्तकस्य नाम किम्, नर्तके नृत्यकला अस्तीत्यादिरूपेण प्रयोगः दृश्यते। नर्तके आगते सभा आरभ्यते इत्यादिरूपेण भावसप्तम्यामपि अस्य प्रयोगः दृश्यते। कर्तृविशेषणत्वात् कर्तुः लिङ्गवचनानुसारेण अस्य ष्वुन्प्रत्ययान्तस्यापि समानलिङ्गवचनत्वं प्राप्नोति। यथा नर्तकः रामः, नर्तकाः रामाः, नर्तकी भगिनी, नर्तक्यः अप्सरसः इत्यादयः। एवमन्येष्वपि ऊह्यम्।

उपसंहारः

आचार्येण पाणिनिना विरचितायाम् अष्टाध्याय्यां तृतीयाध्याये "कृदतिङ्" इत्यनेन कृत्संज्ञां निरूप्य कृत्प्रत्ययाः प्रतिपादिताः। तेषु केवलं कर्त्रर्थकानां कृत्प्रत्ययानामेव वैशिष्ट्यमत्र आलोचितम्। अष्टाध्याय्या तृतीयाध्याये ये कर्त्रर्थकाः कृत्प्रत्ययाः प्राप्यन्ते ते तावत्– क्तवतु, क्त, शतृ, शानच्, कानच्, क्वसु, शानन्, चानश्, ण्वुल्, तृच्, ल्यु, णिनि, अच्, ष्वुन्, ष्यन् चेति। भाषायाम् एतेषां व्यवहारवैचित्र्यं सोदाहरणं ससूत्रं च प्रतिपादितम्। वैयाकरणदृष्ट्या एतेषां प्रत्ययानाम् अर्थाः, वाक्यार्थाः, क्रियान्वयः, लिङ्गवचनाद्यन्वयः चापि प्रदर्शिताः। एवम्प्रकारेण एतेषां कर्त्रर्थककृत्प्रत्ययानां भाषावैज्ञानिकमध्ययनं प्रबन्धेऽस्मिन् सरलतया प्रस्तुतमिति शम्।

***

[1] अष्टाध्यायी – [१/४/१४]
[2] अष्टाध्यायी – [३/१/९३]
[3] अष्टाध्यायी – [१/१/२६]
[4] अष्टाध्यायी – [३/२/१०२]
[5] अष्टाध्यायी – [१/३/८]

[6] अष्टाध्यायी – [१/३/२]
[7] अष्टाध्यायी – [१/३/९]
[8] अष्टाध्यायी – [३/४/६७]
[9] अष्टाध्यायी – [१/१/२६]
[10] अष्टाध्यायी – [३/४/७१]
[11] अष्टाध्यायी – [३/४/७२]
[12] अष्टाध्यायी – [६/४/३७]
[13] अष्टाध्यायी – [३/२/१२४]
[14] अष्टाध्यायी – [३/४/६७]
[15] अष्टाध्यायी – [३/२/१२४]
[16] अष्टाध्यायी – [३/२/१०६]
[17] अष्टाध्यायी – [३/२/१०७]
[18] अष्टाध्यायी – [३/२/१०८]
[19] अष्टाध्यायी – [३/२/१२८]
[20] अष्टाध्यायी – [३/२/१२३]
[21] अष्टाध्यायी – [३/२/१२९]
[22] अष्टाध्यायी – [३/१/१३३]
[23] अष्टाध्यायी – [७/१/१]
[24] अष्टाध्यायी – [३/१/१३३]
[25] अष्टाध्यायी – [५/३/५९]
[26] अष्टाध्यायी – [३/१/३]
[27] अष्टाध्यायी – [३/१/१३४]
[28] अष्टाध्यायी – [३/१/१३४]
[29] अष्टाध्यायी – [३/१/१३४]
[30] अष्टाध्यायी – [३/१/१४५]

ग्रन्थसूची

१) पतञ्जलिः। *व्याकरणमहाभाष्यम्* । श्रीगुरुप्रसादशास्त्री (सम्पा.)। नवदेहली : राष्ट्रियसंस्कृतसंस्थानम्, २००६।

२) भट्टः, नागेशः। *परिभाषेन्दुशेखरः*। मिश्रः, विश्वनाथः (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०११।

३) भट्टः, नागेशः। *लघुशब्देन्दुशेखरः*। प्रो. बालशास्त्री (सम्पा.)। वाराणसी : चौखम्बासुरभारतीप्रकाशन, २००७।

४) भट्टः, नागेशः। *लघुशब्देन्दुशेखरः* (भैरवीटिप्पणीसहितः)। शर्मा, शिवप्रसादः; शर्मा, श्रीनिवासः च (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २००६।

५) भट्टः, कौण्डः। *वैयाकरणभूषणसारः* (सावित्रीव्याख्योपेतः)। मिश्रः, आद्याप्रसादः (सम्पा.)। वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९८८।

६) भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी*। श्रीबालकृष्णशर्मपञ्चोली (सम्पा.)।वाराणसी : मोतीलालबनारसीदास, १९६६।

७) भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी*। श्रीगोपालदत्तपाण्डेयः (सम्पा.)। वाराणसी : चौखम्बासुरभारतीप्रकाशन, २०१०।

८) वामनजयादित्यौ। *काशिका* (न्यासपदमञ्जरीसहिता)। त्रिपाठी, जयशङ्करलालः; मालवीयः, सुधाकरः च (सम्पा.)। वाराणसी : तारा बुक एजेन्सी, १९८४।

***

शिक्षाव्याकरणप्रातिशाख्यशास्त्रदिशा अनुस्वारविवेकः

डॉ. देवाशीष पात्र
प्रकल्प-सहाय्यकः, संस्कृतविभागः, जादवपुर विश्वविद्यालयः

सारसंक्षेपः (Abstract)

'दुष्टः शब्दः स्वरतो वर्णतो वा...' इत्यादिवचनैः शास्त्रेषु अपशब्दप्रयोगः सर्वथा निन्द्यते। न केवलम् उदात्तादिस्वरभ्रमे वर्णान्तरप्रयोगे वा शब्दा दुष्टा इति कथ्यन्ते अपि तु उच्चारमस्थानभ्रष्टत्वात् कलत्वदोषेण मात्रास्खलनत्वात् धात्मत्वादिदोषैरपि शब्दानामपशब्दत्वं जायते। अतः अपशब्दप्रयोगेन यथा नः अवाग्योगविदः अज्ञानशरणाः स्याम‌ः इत्यर्थमस्माभिः शब्दानां यथार्थस्वरूपं ज्ञात्वैव ते प्रयोक्तव्याः। शब्दज्ञानञ्च वर्णज्ञानापेक्षि, वर्णसंघातेनैव शब्दनिष्पत्तेः। संस्कृतवर्णसमाम्नाये त्रिषष्टिषु चतुषष्टिषु वा वर्णेषु अनुस्वारोऽन्यतमः। अथः शिक्षाव्याकरणादिषु अनुस्वारः पृथग्वर्णत्वेनादाय तच्छरूपं वैशद्येन स्पष्टीकृतं ग्रन्थकृद्भिः। परन्त्विदानीं तच्छरूपं न ज्ञात्वैव बहुत्रास्माभिः अपभ्रंशरूपः प्रयोगः क्रियते। अस्मिन् निबन्धे शास्त्रीयदिशा तस्य स्वरूपं पर्यालोच्यते येन अनुस्वारस्य प्रकृतस्वरूपं ज्ञात्वा यथार्थः प्रयोगः कर्तुं शक्यते।

कुटशब्दाः – अनुस्वारः, प्रातिशाख्यम्, शिक्षा, व्याकरणम्, वर्णोच्चारणम् ।

उपोद्घातः

"एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः शास्त्रान्वितः स्वर्गे लोके च कामधुग् भवति"[1] इति महाभाष्यवचनानुसारेण एकस्यैव शब्दस्य शास्त्रानुसारेण यथार्थतया ज्ञाने तस्य सम्यक्प्रयोगे च इहलोके अन्यत्र च मानवः कामधुग् भवति। शब्दज्ञानञ्च वर्णज्ञानापेक्षि, वर्णसंघातेनैव शब्दनिष्पत्तेः। वेदार्थज्ञापनाय प्रवृत्तेषु वेदाङ्गेषु तथा प्रातिशाख्यशास्त्रेषु तस्मादेव आदौ वर्णसमाम्नायस्तथा वर्णविचारः परिलक्ष्यते। तैत्तिरीयोपनिषदः शिक्षावल्ल्याम् आदौ "ओम् शिक्षां व्याख्यास्यामः"[2] इति प्रतिज्ञाया अनन्तरं "वर्णः स्वरो मात्रा बलं साम सन्तानञ्चेति" आदौ वर्णः समुल्लिखितः। व्याकरणस्य मूर्ध्निभूतस्य पाणिनीयव्याकरणस्य सूत्रपाठात् प्रागेव अस्माभिः माहेश्वरसूत्ररूपेण वर्णसमाम्नायः पठ्यते। शिक्षाकृतो वैयाकरणाः प्रातिशाख्यकृतश्च वर्णसंख्यावर्णस्वरूपादिविषये सदैकमत्यं न भजन्ते। वर्णाः प्रधानतः स्वरव्यञ्जनभेदेन द्विधा विभक्ताः शास्त्रकृद्भिः। शिक्षाग्रन्थेषु व्याकरणग्रन्थेषु प्रातिशाख्यग्रन्थेषु च अनुस्वारं विविधोपायेन विचार्य्य तस्य यथार्थस्वरूपं समुद्घाटितं ग्रन्थकारैः।

शिक्षाग्रन्थेषु अनुस्वारः

"वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा"[3] इति सायणाचार्यप्रदत्तात् शिक्षालक्षणात् तेषां वर्णविचारमाहात्म्यं प्रतीयत एव। वर्ण्यन्ते व्यक्तीक्रियन्ते ध्यन्यन्त इति वर्णा अकारादय इति हि व्युत्पत्तिः। शिक्षाग्रन्थेषु अस्माभिरनुस्वारः पृथग्वर्णरूपेण प्राप्यते। स्वरम् अनु भवति इति अनुस्वारः। अकाराद्यनुगमनेन अनुस्वारः इति वा। तस्मादुच्यते शिक्षाप्रकाशे 'स्वरान् अकारादीन् अनु लक्षीकृत्य प्राप्तोऽन्वर्थसंज्ञः' इति। पाणिनीयशिक्षायां प्राकृते संस्कृते चापि साकल्येन त्रिषष्टिः चतुष्षष्टिः वर्णान् वा स्वीकृत्य वर्णगणनाप्रसङ्गे उच्यते –

"स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः॥

अनुस्वारो विसर्गश्च ᳲ क ᳲ पौ चापि पराश्रितौ "।[4] इति।

अतः अत्रानुस्वारः पृथग्वर्णत्वेनैव स्वीकृतः। किञ्च स वर्णः पराश्रिततया प्रतिपादितः, पराश्रितो नाम अनुस्वारः एकाकी पृथग्रूपेण कदापि वाक्ये न प्रयुज्यते, सर्वदा केनचित् स्वरेण स प्रयुज्यते। वर्णरत्नप्रदीपिकाशिक्षायामपि त्रिषष्टिवर्णसु अनुस्वारः पृथग्वर्णरूपेणाङ्गीकृतः –

"स्पर्शानां पञ्चमैर्योगे चत्वारश्च यमाः स्मृताः।
अनुस्वारो विसर्गश्च जिह्वामूलीय एव च"॥[5] इति।

एवं षोडशश्लोकीशिक्षायामपि –

"त्रयस्त्रिंशद्धशा वर्णाः स्वराः द्वाविंशतिः यमाः ।

चत्वारश्च विसर्गोऽनुस्वारः ᳲ क ᳲ पस्त्रिषष्टिका" ॥[6] इति

सामवेदीयायां नारदीयशिक्षायाम् अनुस्वारस्य स्वरूपमुच्यते –

"आपद्यते मकारो रेफोष्मसु प्रत्ययेष्वनुस्वारम्"[7] इति।

अर्थात् मकारो रेफेष्मसु प्रत्ययेषु परतः अनुस्वारत्वमापद्यते।

उपर्युक्तेषु शिक्षाग्रन्थेषु कुत्रापि स्वरवर्णगणनायामनुस्वारो नोल्लिखितः। शिक्षाग्रन्थेषु प्रायेण अनुस्वारः व्यञ्जनवर्णरूपेण प्रतिपादित इति प्रतीयते। किञ्च स पराश्रितः व्यञ्जनप्रकृतिकश्च इति बोध्यम्। अथर्ववेदीयायां माण्डूकीशिक्षायां त्रिविधः अनुस्वारः कर्तव्यः इति निगदितम्। ते यथा – ह्रस्वानुस्वारः, दीर्घानुस्वारः, प्लुतानुस्वारश्च। तत्रोच्यते –

"अनुस्वारास्तु कर्तव्या ह्रस्वदीर्घप्लुतास्त्रयः।
अयँ राजा पशोर्मासं क्षत्रियाणां धनूँषि च ।।[8] इति

अथर्ववेदीयायां माण्डूकीशिक्षायां ह्रस्वदीर्घप्लुतरूपेण अनुस्वारे प्रतिपादितेऽपि अयम न स्वरवर्णत्वेन भाव्यः। माण्डूकीशिक्षायाः परिपूरकरूपे वर्णपटले तु स्पष्टतयोद्घोषितं यत् स्वराः द्वाविंशतिरेव, अयोगवाहा दश एव, अनुस्वारस्य च अयोगवाहरूपेण सिद्धिः।

व्यासशिक्षायां द्विविधः अनुस्वारः स्वीकृतः। वेदतैजसाख्ये व्यासशिक्षाभाष्ये उच्यते –

"द्वावनुस्वारौ तं ध्नन्तीति केवलः।

स ꣳ शितमित्यत्र गकारसंयुतः"।। इति।

अर्थात् केवलः अनुस्वारः, गकारसंयुक्तः अनुस्वारश्च। कदा अनुस्वारस्य गुंकारश्रुतिर्दृश्यते तच्च अग्रे वक्ष्यते।

व्याकरणे अनुस्वारः

वेदार्थस्पष्टीकरणाय प्रवृत्तेषु षट्सु वेदाङ्गेषु वेदपुरुषस्य मुखत्वेनाङ्गीकृतं व्याकरणवेदाङ्गम् अन्यतमत्वेन प्रधानत्वेन च स्वीक्रियते। तस्मादुच्यते पतञ्जलिना – "प्रधानं च षटस्वङ्गेषु व्याकरणम्"[9] इति। संस्कृतभाषायाः व्याकरणेषु मूर्ध्निभूतो हि वर्तते त्रिमुनिव्याकरणमित्यपराभिधः पाणिनीयव्याकरणसम्प्रदायः। पाणिनीयव्याकरणसम्प्रदायेऽपि वर्णसंख्या, वर्णोच्चारणस्थानानि वर्णस्वरूपमित्यादीनि सम्यक् प्रतिपादितानि। भगवता पाणिनिना प्राप्तेषु वर्णसमाम्नायरूपमाहेश्वरसूत्रेषु इत्संज्ञकवर्णान् अतिरिच्य साक्षात् त्रिचत्वारिंशद् वर्णा उपदिष्टाः। एभिरेव वर्णैः ह्रस्वदीर्घप्लुतादिभेदेन अन्याः वर्णाः सम्पद्यन्ते। पाणिनीयव्याकरणसम्प्रदाये अनुस्वारस्तु प्रकृत्या व्यञ्जनमेव, प्राधान्येन पाणिनिना "मोऽनुस्वारः"[10] इति सूत्रेण व्यञ्जनवर्णे परतः पदान्तस्य मः अनुस्वारो विहितः। अपि च "नश्चापदान्तस्य झलि"[11] इति सूत्रेण अपदान्तस्य नकारस्य मकारस्य च झलि परतः अनुस्वारः विधीयते। तेन प्रकृत्या स तु व्यञ्जमेवेति प्रतीयते। "मोऽनुस्वारः" इति सूत्रेण 'हरिम् वन्दे' इत्युदाहरणे व्यञ्जनवर्णस्य वकारस्य परतः स्थितौ पदान्तस्य मः अनुस्वारादेशेन 'हरिं वन्दे' इति रूपं निष्पद्यते। 'यशान् सि' इत्यवस्थायां "नश्चापदान्तस्य झलि" इति सूत्रेण झलि परतः अपदान्तस्य नकारस्य अनुस्वारादेशेन 'यशांसि' इति रूपं प्राप्यते। अतः एभ्य उदाहरणेभ्यः प्रतीयते यत् व्याकरणनिकाये अनुस्वारः व्यञ्जनत्वेनाङ्गीकृतः। पाणिनीयव्याकरणे नुम् इत्यनेनापि कुत्रचिद् अनुस्वार एव परामृष्टः। तस्माद् दीक्षितेन "अट्कुप्वाङ्नुम्व्यवायेऽपि" इति सूत्रे उच्यते – "नुम्ग्रहणमनुस्वारोपलक्षणार्थम्"[12] इति।

यथा पाणिनीयशिक्षायामनुस्वारः पराश्रितत्वेन प्रतिपादितः तथैव व्याकरणे अपि। भट्टोजिदीक्षितेन सिद्धान्तकौमुद्याम् – “अं अः इत्यचः परावनुस्वारविसर्गौ”।[13] इति वचनेन अनुस्वारस्य पराश्रितत्वं प्रतिपादितम्। व्याकरणनिकाये अनुस्वारः अयोगवाह इत्यभिधयापि कथ्यते। न विद्यते योगो येषां वर्णसमाम्नाये ते अयोगाः नाम अनुपदिष्टाः। वाहयन्ति प्रयोगं निर्वाहयन्तीति वाहाः, अयोगाश्च ते वाहाः इति अयोगवाहाः। अर्थात् येषां वर्णसमाम्नाये उपदेशाभावेऽपि कार्यनिर्वाहकत्वमस्ति ते अयोगवाहाः। अनुस्वारोऽपि तथाभूतत्वात् सोऽपि अयोगवाहः। पाणिनीयशिक्षायामपि –

“अनुस्वारयमानां च नासिका स्थानमुच्यते।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः”।।[14]

इति श्लोकेन अनुस्वारः अयोगवाहवर्णरूपेण प्रतिपादितः।

प्रातिशाख्ये अनुस्वारः

प्रातिशाख्यशास्त्राणि अनुस्वारस्वरूपविषये किञ्चित् भिन्नं मतं प्रतिपादयन्ति। ऋग्वेदप्रातिशाख्ये “अनुस्वारो व्यञ्जनं वा स्वरो वा”[15] इति सूत्रेण अनुस्वारस्य व्यञ्जनत्वं तथा स्वरत्वं उभावेव प्रतिपाद्य “उत्तरेऽष्टा ऊष्माणः”[16] इति सूत्रे अनुस्वार ऊष्मवर्णरूपेण प्रतिपादितः। अनुस्वारस्तु कांश्चित् स्वरधर्मान् कांश्चित् व्यञ्जनधर्मान् च अङ्गीकरोति, तस्मात् शौनकेन अस्य उभयधर्मत्वं प्रतिपादितम्। उभयधर्मविशिष्टत्वात् उभयस्वभावः स्वरव्यञ्जनयोः पृथक् वर्णान्तरः अनुस्वारः शौनकेन अङ्गीकृतः। अनुस्वारस्य स्वरधर्माः यथा ह्रस्वदीर्घप्लुतत्वम् उदात्तानुदात्तस्वरित्वतञ्च। व्यञ्जनधर्माश्च अर्धमात्राकालता, स्वरवशेन उदात्तानुदात्तस्वरित्वधर्मत्वं संयोगश्च। अस्य उभयस्वरूपत्वात् ऋग्वेदप्रातिशाख्ये व्यञ्जनशब्देन स्वरशब्देन वा विहिते नियमे अनुस्वारो न प्रवर्तते, स तु स्वशब्दग्रहणेन वर्णग्रहणेन च गृह्यते। अतः स्वरव्यञ्जनभिन्नः पृथग्वर्णः अनुस्वारः इति ऋग्वेदप्रातिशाख्यसिद्धान्तः।

तैत्तिरीयप्रातिशाख्ये “शेषो व्यञ्जनानि”[17] इति सूत्रेण अनुस्वारः व्यञ्जनत्वेन स्वीकृतः। व्यञ्जनत्वेन स्वीकृतेऽपि तत्रानुस्वारस्य ह्रस्वादिस्वरधर्माः विहिता दृश्यन्ते। “अनुस्वारश्च”[18] इति सूत्रेण तैत्तिरीयप्रातिशाख्ये द्विमात्रिके पूर्वे सति अनुस्वारस्य ह्रस्वत्वं तथा एकमात्राकालत्वम् उपदिष्टम्। उच्यते त्रिभाष्यरत्नाख्यां टीकायाम् – “...स्वरं प्रत्यङ्गविधानादनुस्वारस्य व्यञ्जनत्वम्। तथासति ह्रस्वार्धकालं व्यञ्जनमिति अर्धमात्रत्वं प्राप्तं तन्माभूदिति ह्रस्वत्वं विधीयते।”[19] इति। अस्यैव सूत्रस्यानुवादकाले कालाण्डमहाभागेनोच्यते – “The implication being the as in the preceding rules, *anusvāra* is here defined as having the quantity of a short vowel.”[20]

वाजसनेयिप्रातिशाख्ये अनुस्वारं व्यञ्जनवर्णरूपेण स्वीकृत्य विकारभूतस्य तस्य स्वरूपं प्रतिपादितम्। तत्र "अनुस्वारं रोष्मसु मकारः"[21] इति सूत्रेण अनुस्वारो मकारस्य विकार इत्युच्यते। रेफोष्मसु परेषु मकारः अनुस्वारमापद्यते इति। 'अपाम् रसेन' इत्यतः 'अपां रसेन', 'देवम् सवितारम्' इत्यतः 'देवं सवितारम्' इत्यादीनि उदाहरणानि। "नुश्चान्तःपदेऽरेफे"[22] इत्यनेन सूत्रेण वाजसनेयिप्रातिशाख्ये पदमध्ये अरेफे परतः नकारः अनुस्वारो भवतीति विधीयते, प्रकृतसूत्रे चकारात् पदमध्यस्य मकारोऽप्यत्र गृहीतः। अत्रोच्यते भाष्यकृता उवटः – "नकारोऽनुस्वारमापद्यते। चशब्दान्मकारश्च"। यथा – 'हवीन् षि' इत्यतः 'हवींषि', 'पपिवान् सः' इत्यतः 'पपिवांसः' इत्यादीनि। अतः अनुस्वारः मकारप्रकृतिकः नकारप्रकृतिकश्च भवतीति वाजसनेयिप्रातिशाख्यसिद्धान्तः।

अनुस्वारोच्चारणस्थानं तदुच्चारणविधिश्च

यस्मिन् स्थाने वर्णा उपलभ्यन्ते तद्ध्युच्चारणस्थानमित्युच्यते। येन च वर्णा निवर्त्यन्ते तत् करणमित्युचे। शास्त्रेषु वर्णानाम् अष्टौ उच्चारणस्थानानि स्वीकृतानि – उरः, कण्ठः, शिरः, जिह्वामूलं, दन्ताः, नासिका, ओष्ठौ, तालु च । उच्यते च पाणिनीयशिक्षायाम् – "अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।

जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ।।"[23]

पाणिनीयशिक्षायाम् अनुस्वारस्य नासिकास्थानम् उक्त्वा पुनः तम् अयोगवाहरूपेण प्रतिपाद्य पराश्रितत्वात् आश्रयस्थानमपि तत्स्थानरूपेण स्वीक्रियते। तेन अनुस्वारस्य स्थानद्वयं भवति – नासिका, आश्रितवर्णस्थानञ्च। यथा देवदत्तं वदति इत्युदाहरणे अनुस्वारस्य उच्चारणस्थानं नासिका दन्ताश्च, आश्रयभूतस्य तकारस्य दन्तस्थानत्वात। भणितं च पाणिनीयशिक्षायाम् –

"अनुस्वारयमानां च नासिकास्थानमुच्यते।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः।।"[24]

वाजसनेयिप्रातिशाख्ये "यमानुस्वारनासिक्यानां नासिके"[25] इति सूत्रेण अनुस्वारस्य उच्चारणस्थानं नासिका इति प्रतिपादितम्। अपि च "जिह्वामूलीयानुस्वारा हनुमूलेनेति"[26] इति सूत्रेण अनुस्वारस्य करणं हनुमूलमिति दर्शितम्। एवं शिक्षाप्रातिशाख्यव्याकरणशास्त्रेषु अनुस्वारस्य नासिकास्थानमेव निर्दिष्टम्। अतोऽनुस्वारो नासिकास्थानादेव उच्चारणीय इति शास्त्रसिद्धान्तः।

पाणिनीयशिक्षायां परसवर्णत्वाभावे नित्यस्थितस्यानुस्वारस्य उच्यते यत् अलाबुनिर्मिताया वीणाया यथा नादः श्रूयते दन्तमूल्यस्तादृशः अनुस्वारः कर्तव्यः ।[27] वैयाकरणनिकाये तु अनुस्वारस्य नासिकास्थानमेव प्रतिपादितम् – "नासिकानुस्वारस्य"[28] इत्यादिवचनेन। याज्ञवल्क्यशिक्षायामनुस्वारस्य विविधाः उच्चारणविधयः प्रतिपादिताः।

शुक्लयजुर्वेदे अनुस्वारस्य गुंकारोच्चारणं दृश्यते। अनुस्वारस्य नासिकास्थानत्वात् हनुमूलकरणत्वाच्च शुक्लयजुर्वेदे हनुमूलेन नासिकायां वर्णे उच्चारिते गुंकारश्रुतिर्दृश्यते। स च गुंकारध्वनिः ह्रस्वात् परं दीर्घरूपेण, दीर्घात् परं संयोगपरे च ह्रस्वरूपेण उच्चार्यते। याज्ञवल्क्यशिक्षायामनुस्वारस्य कदाचिदेकमात्रिकत्वं कदाचिच्च द्विमात्रिकत्वमपि प्रतिपादितमस्ति। यथा-

"वर्णे तु मात्रिके पूर्वे ह्यनुस्वारो द्विमात्रिकः।
द्विमात्रिके मात्रिकः स्यात् संयोगाद्यश्च यो भवेत्।।"[29] इति।

याज्ञवल्क्यशिक्षाकृता त्रिविधस्य अनुस्वारोच्चारणस्य उदाहरणपुरस्सरं स्पष्टीकृतम्-

"अनुस्वारस्योपरिष्टात्संयोगो यत्र दृश्यते।
ह्रस्वं तं तु विजानीयात् स ꣳ स्थानमिति दर्शनम्।।"[30] इति

अनुस्वारादुत्तरं यत्र संयोगो वर्तते तत्रानुस्वारो ह्रस्वो भवति। स ꣳ स्थानमिति च निदर्शनम्। याज्ञवल्क्यशिक्षानुसारेण एकमात्रिकाद् द्विमात्रिकाद् वा वर्णादनुस्वारस्य ऋवर्णपरकव्यञ्जनोदये दीर्घोच्चारणं भवति। उच्यते च तत्र –

"अनुस्वारो द्विमात्रः स्यादृवर्णव्यञ्जनादिगः।
ह्रस्वाद् वा यदि वा दीर्घाद् देवाना ꣳ हृदये यथा"।।[31] इति।

अस्मिन्नुदाहरणे 'देवानां गुं हृदये' इत्यत्र ऋवर्णपरकस्य व्यञ्जनहकारस्य उदये दीर्घादपि नकारोत्तराकारात् परोऽनुस्वारो दीर्घ एव प्रयुज्यते, न तु ह्रस्वः।

अत्रोल्लेख्यं दीर्घाक्षरात् परोऽनुस्वारः सर्वदा ह्रस्व एव उच्चार्यते, तत्र च दीर्घत्वं विभाषया एवेति बोध्यव्यम्। तस्मादुच्यते याज्ञवल्क्येन-

"अनुस्वारस्तु यो दीर्घादक्षराद्यो भवेत् परः।
स तु ह्रस्वमिव ज्ञेयो मन्त्रेष्वेव विभाषया"।।[32] इति।

अत्रेदमवधेयं यदियं विभाषा हि व्यवस्थितविभाषा। तस्मात् पूर्वोक्तश्लोकेन येषु स्थलेषु दीर्घविधानमस्ति तेष्वेव मन्त्रेषु केवलं दीर्घो भवति अन्यत्र तु सर्वत्र अनेन विधिना ह्रस्वमेव तमवगन्तव्यम्। अतः मन्त्रातिरिक्तस्थलेषु ऋवर्णपरकव्यञ्जनोदयेऽपि दीर्घात् परश्चेदनुस्वारो न द्विमात्रिकः प्रयोज्यः, परन्तु ह्रस्व एवेति शिक्षाशास्त्रसिद्धान्तः।

उपसंहारः

अतोऽनुस्वारो अर्धमात्रिको मात्रिको द्विमात्रिको वा कोऽपि भवतु, परन्तु तस्योच्चारणन्तु नासिकाभ्यामेव क्रियते। तेन आदितोऽन्तपर्यन्तं नासिकास्थानादेव उच्चार्यमाणस्य ध्वनिविशेषस्य अनुस्वार इति व्यवहारः। यत्तु कैश्चित् अनुस्वारो रङ्ग एव इति मन्यते तन्न साधु, रङ्गस्य सर्वस्यापि नासिकास्थानाभावात्। अनुस्वारस्य यथार्थतया प्रयोगेन सुवक्ता भवितुकामश्चेत्तदा तच्छरूपं तु अवश्यमेव ज्ञेयम्। अनेन चानुस्वारस्य स्वरूपं वैशद्येन ज्ञातुं शक्यते। अनुस्वारस्य प्रकृतस्वरूपज्ञानेन यथार्थतया लोकव्यवहारः शक्यते सम्पादयितुम्। यद्यपि शिक्षाग्रन्थेषु प्रातिशाख्येषु विशिष्टस्थलेषु अनुस्वारस्यैकमात्रत्वं द्विमात्रं च विहितं परन्तु प्रकृत्या अयं वर्णः व्यञ्जनत्वात् साधारणतया अस्य अर्धमात्रत्वमेव अस्माभिः ज्ञेयम्। येषु स्थलेषु शास्त्रकृद्भिः ह्रस्वत्वादिकं सूत्रेण उपदिष्टं तादृशेषु एव स्थलेषु तथा ज्ञेयम्, नान्यत्र। महाभाष्यकृता पतञ्जलिना पस्पशाह्निके उच्यते- "पुराकल्प एतदासीत् संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते। तेभ्यस्तत्तत्स्थआनकरणानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते। तदद्यत्वे न तथा" इति। व्याकरणमत्र उपलक्षणम्। पुरा सर्वे अध्येतारः सर्वं वेदाङ्गशास्त्रमधीयन्ते स्म। व्याकरणतः शिक्षाशास्त्रतश्च वर्णानां स्थानकरणानुप्रदानादीन् ज्ञात्वैव ते वेदमपठन्। परन्तु अद्यत्वे तथा न भवति। लोकेऽपि अस्माभिः अनुस्वारस्य विकृतोच्चारणं परिलक्ष्यते। तस्मात् शिक्षाशास्त्राध्ययनाभावात् वर्णानां सम्यक्स्वरूपज्ञानाभावाच्च यथार्थं वर्णोच्चारणं न दृश्यते। अनुस्वारोऽपि नास्य व्यत्ययः। अधुना यैर्मन्त्रोच्चारणं क्रियते तत्र अनुस्वारोच्चारणं सम्यकरूपेण कदाचिन्न दृश्यते, तस्य स्वरूपज्ञानावात्, उच्चारणज्ञानाभावाच्च। अतः शास्त्रेभ्यः अनुस्वारस्य स्वरूपं यथार्थतया ज्ञात्वा प्रयोगः करिष्यते चेत् तत्र न अनिष्टापत्तेराशङ्का उदेतीति शिवम्।

---

[1] श्रुतिवचनमिदं महाभाष्ये एकः पूर्वपरयोरिति सूत्रे उद्धृतम्।

[2] तैत्तिरीयोपनिषद् १.१.१

[3] सायणाचार्यविरचिता ऋग्वेदभाष्यभूमिका

[4] पाणिनीयशिक्षा ४-५

[5] वर्णरत्नप्रदीपिकाशिक्षा १४

[6] षोडशश्लोकीशिक्षा २

[7] नारदीयशिक्षा २.४.४

[8] माण्डूकीशिक्षा ८.११

[9] महाभाष्यस्य पस्पशाह्निकम्

[10] अष्टाध्यायी ८.३.२३

[11] तदेव ८.३.२४

[12] वैयाकरणसिद्धान्तकौमुदी १९७

[13] तदेव संज्ञाप्रकरणम्

[14] पाणिनीयशिक्षा २२

[15] ऋग्वेदप्रातिशाख्यम् १.७

[16] तदेव १.१०
[17] तैत्तिरीयप्रातिशाख्यम् १/६
[18] तदेव १/३४
[19] तदेव त्रिभाष्यरत्नम्
[20] Taittiriyapratiśākhyam. Ed. W. caland. P-28.
[21] वाजसनेयिप्रातिशाख्यम् ४.१
[22] तदेव ४.२
[23] पाणिनीयशिक्षा १३
[24] तदेव २२
[25] वाजसनेयिप्रातिशाख्यम्. १.३४
[26] तदेव १.८३
[27] पाणिनीयशिक्षा २३
[28] वैयाकरणसिद्धान्तकौमुदी संज्ञाप्रकरणम्
[29] याज्ञवल्क्यशिक्षा २.४२
[30] तदेव २.४७
[31] तदेव २.४८
[32] तदेव २.४९

निर्वाचितग्रन्थपञ्जी

घोषः, म. (सम्पा.) (१९३८). *पाणिनीयशिक्षा.* क्यालकाटा, पश्चिम वङ्गालः इउनिभार्सिटि अब क्यालकाटा.

झा, उ. (सम्पा.) (१९८९). याज्ञवल्क्यशिक्षा. वाराणसी, उत्तरप्रदेशः चौखाम्बा ओरियेन्टाला.

नेने, ग. शा. (सम्पा) (१९७७) वैयाकरणसिद्धान्तकौमुदी भट्टोजिदीक्षितस्य. वाराणसी, उत्तरप्रदेशः चौखैम्बा संस्कृत सिरिज ऑफिस.

पाठकः, ज. (सम्पा.) (२०१५). *अथर्ववेदप्रातिशाख्यम् अथवा अथर्ववेदीया चतुरध्यायिका*. वाराणसी, उत्तरप्रदेशः चौखाम्बा विद्याङवनम्.

भगवद्दत्तः (सम्पा) (१९२१). *माण्डूकीशिक्षा*. नइ दिल्ली, दिल्लीः मेहरचन्द लछमनदास पब्लिकेशन्स.

भिसे, इउ. आर. (सम्पा.) (१९८६). *नारदीयशिक्षा*. पुणा, महाराष्ट्रः भाण्डारकर ओरियेन्टाल रिसर्च इनष्टिटिउट.

वर्मा, वी. (सम्पा.) (१९७०). *ऋग्वेदप्रातिशाख्यम्*. वाराणसी, उत्तरप्रदेशः चौखम्बा संस्कृत प्रतिष्ठान.

वर्मा, सि. (१९६१). *क्रिटिकल स्टाडिज् इन द्य फोनेटिक अबजर्वेशन अब इन्डियन ग्रामारियन्स*. नइ दिल्ली, दिल्लीः मुन्सिराम मनोहरलाल ओरियेन्टाल पब्लिशार्स एण्ड वुकसेलार.

वसु, श. (सम्पा.) (१८९७). *अष्टाध्यायी*. वेनारस, उत्तरप्रदेशः सिन्धु चरण वोस.

शर्मा, वि. (सम्पा.) (१९३०). *तैत्तिरीयप्रातिशाख्यम्*. माद्रास, तमिलनाडुः इउनिबर्सिटि अब माद्रास.

शर्मा, वि. (सम्पा.) (१९३४). *वाजसनेयिप्रातिशाख्यम्*. माद्रास, तमिलनाडुः इउनिबर्सिटि अब माद्रास.

सांख्यवेदान्ततीर्थ, द. (सम्पा.) (२००८). *तैत्तिरीयोपनिषत्*. कलकाता, पश्चिमवङ्गालः देव साहित्य कुटिर प्राइभेट लिमिटेड.

लोकव्यवहारे चित्तसमाधये योगशास्त्रोपयागिता

प्रभातकुमारमण्डलः,

शोधच्छात्रः,संस्कृतदर्शनविभागः, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानम्,
वेलुडमठः,हावडा,पश्चिमवङ्गः

भूमिका

चित्तमूलोयं सर्वो लोकव्यवहारः। चित्तवृत्त्यनुरूपमेव लोकः प्रवर्तते। कथमन्यथा एकस्मिन्नेव क्षेत्रे निक्षिप्तेभ्यः बीजेभ्यः अतुल्या अङ्कुरोत्पत्तिरिव समाने देशे काले च भिन्ना भिन्ना प्रवृत्तिर्दृश्यते जनानाम्। यथा पुरुषोत्तमस्य श्रीरामस्य वनगमनप्रसङ्गः। पट्टाभिषेकात् पूर्वं पितृन् अभिवन्दनाय यातः श्रीरामः पितुः विषन्नतां वीक्ष्य मातरं कैकेयीं तत्कारणं पप्रच्छ। तदा कैकेयी तं प्राह हे राम पुरा देवासुरसंग्रामे मह्यं मया रक्षितेन महाराजेन वरौ दत्तौ। तदद्य प्रार्थितौ राम भरतस्य अभिषेचनं तव च चतुर्दशवर्षाणि यावत् दण्डकारण्ये वासश्चेति वरौ इति। ततः रामः धर्मात्मा देशकालविद् अदोलायमानचित्तः किं कर्तव्यं किमकर्तव्यमिति विविच्य पित्राज्ञापरिपालने एव धर्मः इति निश्चित्य वनं प्रातिष्ठत्। वर्णयति अत्र कविकुलगुरुः कालिदासः-

दधतः मङ्गलक्षौमे वसानस्य च वल्कले।
ददृशुर्विस्मितास्तस्य मुखरागं समं जनाः॥[1] इति।

अर्थात् मङ्गलक्षोम पट्टाभिषेकार्थं वस्त्रं वल्कलं च धारयतः तस्य रामस्य समं मुखरागं मुखवर्णं जनाः विस्मिताः सन्तः ददृशुः। अर्थात् उभयकाले एव तस्य मुखरागः समान एव आसीत्। विकार एव नासीत् मनसि। न तु असमाहितचित्ताः एवं व्यवहर्तुं क्षमाः। यथा तत्रैव असमाहितचित्तस्य लक्ष्मणस्य व्यवहारः परिलक्षणीयः। स हि धर्मज्ञोपि हनिष्यामि सर्वान् भरतादीन्, पितुः आज्ञा कथमपि न परिपालनीया वनगमनेन अग्रजेन इति अधर्मं कथयति कौशल्याम्। वर्णयति च भगवान् वाल्मीकिः -

भरतस्याथ पक्ष्यो वा यो वास्य हितमिच्छति।
सर्वांस्तांश्च वधिष्यामि मृदुर्हि परिभूयते॥[2] इति।

रामश्च धर्मात्मा धर्मः एव श्रेष्ठः सोधुना पितृवचनपालनलक्षणः परिपालनीयः इति लक्ष्मणं बोधयति

धर्मो हि परमो लोके धर्मे सत्यं प्रतिष्ठितम्।
धर्मसंश्रितमप्येतत्पितुर्वचनमुत्तमम्॥[3] इति।

यथा वा अध्यात्मरामायणे

सुखस्य दुःखस्य च न कोपि दाता
परो ददातीति कुबुद्धिरेषा।

अहंकरोमीति वृथाभिमानः
स्वकर्मसूत्रग्रथितो हि लोकः।। इति

रामः मूर्तिमान् धर्मः। परिस्थितिः या कापि वा भवतु समाधाय चित्तं कर्तव्याकर्तव्यविवेकेन आचरति सदा।

अतः अस्ति किञ्चित् नियामकं यत्तथा तथा प्रवर्तयति जनान्। तन्मनः। स्वरूपावस्थानादन्यत्र तद्वृत्त्यविशिष्ट एव पुरुषः। तथाहि पारमर्षं सूत्रम् - वृत्तिसारूप्यमितरत्र[4] इति। अर्थात् इतरत्र स्वरूपावस्थानादन्यत्र व्युत्थाने चित्तस्य या वृत्तयः शान्तघोराद्याः तदविशिष्टः तदभिन्नः एव पुरुषः। मलिने दर्पणे प्रतिबिम्बितं मुखं यथा मलिनमारोप्य शोचति आत्मानं मलिनोस्मीति एवं पुरुषोपि चित्तगतं सुखादि आत्मनि आरोप्य अध्यवस्यति अहं सुखी वा दुःखी वेति।

समाहितचित्त एव पुरुषः साधुलोकव्यवहारक्षमः यथा श्रीरामः। असमाहितचित्तस्तु निश्चतोपि दोलाचलचित्तवृत्तिना भूयते। यथा अर्जुनः अपरिहार्योधुना समरः, अतो हे केशव रथं मध्ये सेनयोः स्थापय, पश्यामि तावत् धृतराष्ट्रनीतापथबुद्धयः के युद्धाय समागताः। परन्तु तत्रैव सेनयोरुभयोः आचार्यान् पुत्रान् पितामहान् पौत्रान् स्वबान्धवान् च वीक्ष्य चञ्चलचित्तः हनिष्यामि अरीन् सर्वानाहवे इति पूर्वं कृतनिश्चयोपि विषण्णः। कथयति च स्थितिं स्वीयां वासुदेवाय -

दृष्टेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम्।

सीदन्ति मम गात्राणि मुखं च परिशुष्यति

वेपथुश्च शरीरे मे रोमहर्षश्च जायते।।

गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते।

न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः।।[5] इति।

अन्ते च अलं युद्धेन , भैक्ष्याचर्येण वा जीविष्यामि , हे केशव अहं न योत्स्ये इति निश्चयं श्रावयति। एवम् असमाहितसमाहितचित्तयोः व्यवहारे भेदो महान् शक्यः परिलक्षयितुम्। असमाहितचित्ता एव पुरुषाः व्यवहरमाणाः अधिकाः दृश्यन्ते लोके। प्रतीयन्ते खलु व्याधिस्त्यानादिदुःखदौर्मनस्यादि विक्षिप्तचित्तसहभुवः। व्याधिसंशयादिचित्तमलाः दुःखदौर्मनस्यादि च लिङ्गं विक्षिप्तचित्ते। तानि सम्प्रति निरूप्यन्ते -

१ - चित्तविक्षेपाः -

विक्षिपन्ति अपनयन्ति योगात् चित्तमिति विक्षेपाः व्याध्यादयः अन्तरायाः। ते एव अन्तरायाः योगमलाः योगप्रतिपक्षाः इति अभिधीयन्ते। तान्निरूपयन्नाह भगवान् पतञ्जलिः - "व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनाऽलब्धभुमिकत्वाऽनवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः"[6] इति।

१.१ - व्याधिः।

व्याधिः नाम धातुरसकरणवैषम्यम्। वातपित्तकफाः शरीरधारणात् धातवः। गृहीतस्य आहारस्य परिणामविशेषः रसः। करणानि चक्षुरादीनि। वैषम्यं न्यूनाधिकभावः। तत्र वातादिधातुवैषम्ये तन्द्रानिद्राधाक्यस्तैमित्यादयः श्लोष्मजाः नखभेदपादशूलादयः वातजाः पित्तजाः वा ओषप्लोषादयः रोगाः सम्भवन्ति। वैषम्यं च तेषां चित्तचाञ्चल्यहेतुना अभक्ष्यभक्षणादिना सम्भवति। यत् यावत् भोक्तव्यं तत् तावत् न भुङ्क्ते। यत् न भोक्तव्यं तद्वा अधिकं भुङ्क्ते। रसवैषम्यमपि तथा। चित्ते निग्रहः नास्ति चेत् कुत्रचित् गत्वा पतेत् अस्थाने वा पादं स्थापयेत्।

१.२ - स्त्यानम्।

चित्तस्य अकर्मण्यता स्त्यानम्। एवं लोके भवति यत् अस्माभिः कार्यं क्रियते परन्तु चित्तं कुत्रचिदन्यत्र एव भवति। तदा कार्यं न साधु सिध्यति। यथा कश्चित् छात्र सम्यगुपविश्य होराद्वयं वा उच्चैः पठतु नाम यदि मनः तत्र नास्ति तर्हि पाठः फलाय न कल्प्येत।

१.३ - संशयः।

उभयकोटिस्पृग्विज्ञानं संशयः स्थाणुर्वा पुरुषो वा इति। लोके यथा कश्चित् छात्रः किम् एतत् पठामि उत तत्। किम् अहम् कार्याय एतस्मै समर्थः उत न। स तूत्तमः सर्वं साधयेत् अहं किं कुर्याम् इति सन्दिहानः निश्चयेन न किञ्चित् कुर्वाणः अन्ते तत्तत्कार्यासिद्धेः परितप्यति। एवं संशयाग्निरेव दहति चित्तम्। "संशयात्मा विनश्यति"[7] इति भगवता भृशं संशयानस्य नाश एव दर्शितः।

१.४ - प्रमादः।

अननुष्ठानशीलता अनवधानता शमादिभावनाभावो वा प्रमादः। यथा सत्यं वद धर्मं चर इति शास्त्रेण बोध्यते। अस्माभिस्तु तथापि तद्विरुद्धम् असत्यभाषणादि आचर्यते।

१.५ - आलस्यम्।

कफादिना देहस्य चित्तस्य च तमसा गुरुत्वात् अप्रवृत्तिः आलस्यम्। यथा प्राप्तं कार्यम् अद्य न करोमि श्रान्तोस्मि अत्यन्तं श्वः एव एतत् करोमि इति भावः। छात्रजीवने एतत् बहु

अनुभूयते आ वर्षं पठनीयानां विषयाणां आलस्यवशात् अपठितानां "समापनीयाः ते" इति बुद्धिः परीक्षायाः पूर्वस्मिन् मासे उदेति।

१.६ - अविरतिः

अविरतिः गर्धः तृष्णा अभिलाषः इत्यर्थः। तयाकृष्टः स्वकर्तव्यं विहाय अन्यत्र रमते पुरुषः। यथा दूरवाण्यासक्तः छात्रः अध्ययनम् अन्तरा तत्र रमते।

१.७ - भ्रान्तिदर्शनम्।

भ्रान्तिदर्शनं नाम विपर्ययः मिथ्याज्ञानम् गुर्वादिप्रमितार्थविपरीतनिश्चयः इत्यर्थः। यथा प्रसिद्धमाभाणकम् "সত্সঙ্গে সর্গবাস অসত্সঙ্গে নরকবাস" इति। साधुजनैः एव व्यवहारः कर्तव्यः इति तात्पर्यम्। परन्तु बालकाः विचारहीनाः असद्भिरेव व्यवहरन्ति। ते न सन्तः अनिष्टमेव इच्छन्ति भवतामिति बोध्यमाना अपि मात्रादिना तद्विपरीतमेन निश्चिन्वन्तः विपरीतमाचरन्ति। अन्ते च दुःखम् अनुभवन्ति। यथा वा अध्ययनकर्मणि। पित्रादिभिः वारं वारं बोध्यमानोपि न किञ्चिदपि अध्ययनेन भविता मम, अहं तु pubg क्रीडकः स्याम् तेनैव धनानि लभेय इति विपरीतं गृह्णाति।

अलब्धभूमिकत्वानवस्थितत्वयोस्तु लोके तथा व्यवहारो न विद्यतेतोत्र न विचार्येते ते।

अन्यानपि अन्तरायान् निरूपयन्नाह - "दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः"[8] इति।

१.८ - दुःखम्।

दुःखं तावत् त्रिविधं भवति आध्यात्मिकम् आधिभौतिकम् आधिदैविकं च।आत्मानं शरीरं मनश्च अधिकृत्य प्रवर्तमानम् आध्यात्मिकं दुःखम्। शारीरं तावत् दुःखं वातादिवैषम्यजनितं नखभेदादि प्रसिद्धमेव। वैषम्यं च वातादीनां मनश्चाञ्चल्यहेतुना अभक्ष्यभक्षणादिना जायते। आन्त्यं तु मानसं कामादिजं विषादादि। यथा अर्जुनस्य चित्तासमाधानकारणः विषादः(depression)। आत्महननं (suicide) अपि मानसवैषम्येन एव जायते।

देवानधिकृत्य जायमानम् आधिदैविकम्। यथा वा महाराजदिलीपस्य पुत्राजनिशोकः देवनिमित्तः। तथाहि रघुवंशे उच्यते -

पुरा शक्रमुपस्थाय तवोर्वीं प्रति यास्यतः।
आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि।
धर्मलोपभयाद्राज्ञीमृतुस्नातामिमां स्मरन्।
प्रदक्षिणक्रियार्हायां तस्यां त्वं साधु नाचर।।[9] इति।

तत्र धर्मलोपभयचित्तवृत्तिनाभिभूतचित्तः दिलीपः राजा धर्मज्ञोपि अमरावतीतः स्वराज्यम् आशु

गच्छन् कल्पवृक्षच्छायामाश्रितायां कामधेन्वां प्रदक्षिणार्हायां साधु नाचचार। ततश्च आत्मावमाननेन क्रुद्धा सुरभिः राजानं शशाप। निमित्तं च शोकस्य पुत्राजनिलक्षणस्य राज्ञः स सुरभिशापः। उच्यते खलु "प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः"[10] इति।

आधिभौतिकं नाम भूतानि व्याघ्रादीनि अधिकृत्य अधिकृतम्। यथा लोके सर्पादिजनिता भीतिः। प्रियविच्छेदजनितो वा खेदः। सन्तस्तु तत्र "संयोगो विप्रयोगान्तः"[11] इति अवधार्य पूर्ववत् व्यवहरति।

१.९ - दौर्मनस्यम्।

दौर्मनस्यं नाम चित्तस्य क्षोभः। शान्ते सरोवरे प्रस्तरनिक्षेपेण यथा क्षोभो जायते एवम् इच्छाविघातात् मनसोपि क्षोभो जायते। बाहाभ्यन्तरकारणैः चित्तस्य अस्वास्थ्यम् चित्तचाञ्चल्यम् इत्यर्थः। यथा यत्किञ्चित् वस्तु यथा दुरवाणी द्विचक्रिका वा अपेक्षिता इति इच्छायाः विघातेन क्रोधः विषादो वा जायते। तदनुसारं च व्यवहरति अनुचितम्।

१.१० - अङ्गमेजयत्वम्।

अङ्गमेजयत्वम् अङ्गकम्पः। यथा गीतायाः प्रथमाध्याये अर्जुनस्य विषादजन्यः अङ्गकम्पः। लोकेपि भयार्तस्य अङ्गकम्पः बहुधा परीलक्षयितुं शक्यः। यथा छात्रस्य परीक्षाभीतिजन्यः अङ्गकम्पः।

१.११ - श्वासप्रश्वासौ।

प्रयत्नम् अन्तरा प्राणः स्वयमेव यं बाह्यं वायुमतिशयेन आचमति अन्तः प्रवेशयति स श्वासाभिधः विकारः। श्वासविपरीतश्च प्रश्वासः। तदा प्राणः पुरुषप्रयत्नं विनातिशयेन कौष्ठ्यं वायुं बहिः निःसारयति। इमौ श्वासप्रश्वासौ यथाक्रमं रेचकपूरकविरोधिनौ।

एवं त्रिविधदुःखानि व्याधयः आधयश्च सर्वेऽन्तरायाः चित्तविक्षेपहेतवः। कदाचित् मानसोद्वेगवशात् शारीराः अपि रोगाः जायन्ते। यथा छात्रस्य परीक्षायाः अत्यन्तं भीतस्य ज्वरो मे भविता भ्रमति मे शिरः स्वस्थः नास्मि इति तीव्रचित्तोद्वेगवशात् ज्वरः शिरोवेदना वा जायते इति लोके परिलक्ष्यते।

सर्वेप्यमी अन्तरायाः व्याध्यादयः चित्तविक्षेपवतः एव सम्भवन्ति न तु चित्तसमाधिवतः। उक्तं च व्यासभाष्ये - "विक्षिप्तचित्तस्यैते भवन्ति। समाहितचित्तस्यैते न भवन्ति" इति।

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।
सङ्गत्सञ्जायते कामः कामात्क्रोधोऽभिजायते।।

क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति।।[12]

इति असमाहितचित्तस्य एव नाशान्ता गतिः प्रोक्ता भगवता न तु समाहितचित्तस्य। समाहितचित्तः तथा विकृतगुणानां कृते आस्पदमेव न ददाति। चित्तसंयमात् व्यवहारे दक्षता उदेति। संयमी यत्करोति तदेव वीर्यवत्तरं भवति। भगवती श्रुतिरपि वक्ति - "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति"[13] इति। स हि विषयचयनं विषये आसक्तिं च बुद्धिपूर्वकमेव करोति। यत् करोति तदेव सम्यक् भवति।

चित्तासमाधानकारणात् चित्तस्य नियन्त्रणं न सम्भवति। स्वायत्तीकरणं च चित्तस्य न स्थगनमपि तु यथाभिमतं प्रवर्तनम्। यथा वाइक्-याने मम नियन्त्रणम् अस्ति इत्यस्य यानं स्थगयितुं प्रभवामि इति नार्थोपि तु यथाछन्दं तत् चालयितुं समर्थः इत्यर्थः। चित्तं वशे नास्तीत्यतः एव समस्या जायते। यथा कश्चित् छात्रः श्वः चतुर्वादने अवश्यमुत्थाय पठिष्यामि कथमपि अन्यथा न भविता इति निश्चित्य दूरवाण्यां घटियन्त्रे वा संकेतं(alarm) स्थापयति। परन्तु घननिद्राच्छन्नः कदाचित् स संकेतं न शृणोति। कदाचित् शृणोति परन्तु इतोपि पञ्चनिमेशान् शये इति चिन्तयति। पञ्चनिमेशाश्च कदा घण्टायते इति नैव ज्ञायते। तदनन्तरं च मनः तं खेदयति अयि भोः निश्चित्यापि समये नोत्थितं त्वया। त्वया किमपि न सिद्ध्येत् इति। अथवा संकेतं श्रुत्वा उत्थाय पठति चेदपि तत्र नैरन्तर्यं स्थापयितुं न प्रभवति। यथा वा वयं वर्षारम्भे पञ्जिकां निर्माय इतः एतदनुसारि एव जीवनं भविता इति निश्चयं कुर्मः। परन्तु प्रायेण तस्याः आयुः अधिकाधिकं सप्ताहद्वयमेव भवति इति लोकप्रसिद्धम्। कथमेवम् भवतीति चेत् चित्तस्य नियन्त्रणाभावादेव एवम्भवति। यथा वा सः राहुलस्तु सम्यक् छात्रः। तस्य भाविकालः उज्ज्वलः। अहं तु मूढः मया किमपि न भविता इति अवसादग्रस्तो भवति। कदाचित् गृहान्तःकलहाः अपि अल्पीयसा उचितव्यवहारेण शमयितुं शक्याः तथापि अभिमानाद्यभिभूताः जनाः स्वमानरक्षणे तत्पराः न तथा कुर्वन्ति। मानं हित्वा खलु सुखी भवेत्।

एवं विचारयामश्चेत् जीवने उपागतानां समस्यानां मूलकारणं चित्तमेव इति स्थिरीकृतं स्यात्। चित्तोद्वेगहेतुरेव सकलोप्यनर्थप्रचयः। तदुपायश्च चित्तैकाग्र्यम्।

२ - चित्तसमाधानोपायाः।

ऐकाग्र्यं समाधानं वा चित्तस्य नैर्मल्ये सति सम्भवं न तूद्वेगे। उद्वेगप्रशमनोपायौ च प्रोक्ते अभ्यासवैराग्ये "अभ्यासवैराग्याभ्यां तन्निरोधः"[14] इति। भगवान् वासुदेवोपि मनोनिग्रहाक्षमाय पार्थाय अभ्यासवैराग्यलक्षणौ एव मनोनिग्रहोपायौ उपदिदेश।

अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते। इति।

२.१ - अभ्यासवैराग्ये।

अभ्यासो नाम स्थित्यै चित्तस्य प्रशान्तवाहितायै सम्पाद्यमानो यत्नः। उक्तं च “तत्र स्थितौ यत्नोभ्यासः”[15] इति। स च सत्कारपूर्वकं सादरं नैर्यन्तर्येण च क्रियमाणः फलप्रदो भवति नान्यथा।

वैराग्यं च शास्त्रे तुरीयं वशीकारसंज्ञमेवाभिमतम् तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यं वशीकारसंज्ञा वैराग्यम् इति। तथाहि अपरवैराग्यस्य हि यतमानसंज्ञा , व्यतिरेकसंज्ञा , एकेन्द्रियसंज्ञा , वशीकारसंज्ञा चेति चत्वारो भेदाः। तेषु चरमं शास्त्राभिमतम्। न तु लोकजीवने तद्घटते। तद्धि परिहर्तव्यानां परिहारलक्षणम्। यथा परीक्षायामुत्तीर्णोहं स्यामिति निश्चितः विद्यार्थी अध्ययनभिन्नकार्याणि परिहर्तव्यानि परिहरेत्। यथा वा कश्चित् क्रीडकः क्रीडाभिन्नकार्याणि परिहर्तव्यानि परिहरेत्। अभ्यसेच्च तन्मात्रं नैरन्तर्येण। इत्थं भिन्नभिन्नक्षेत्रे भिन्नभिन्नलक्षणं वैराग्यं ज्ञेयम्। कदाचित् एवं सन्देहः स्यात् केवलेन अभ्यासेन वैराग्येण वा चित्तं समाहितं स्यान्न वा इति। तत्र नास्ति विकल्पः समुच्चितेन एव अभ्यासवैराग्येण चित्तसमाधानम्। तथाहि उक्तं वाचस्पतिमिश्रेण - "अभ्यासवैराग्ययोर्वैराग्ये जनयितव्येवान्तरव्यापारभेदेन समुच्चयः न तु विकल्पः"[16] इति। योगवार्तिकेपि उक्तम् - "अभ्यासवैराग्ययोरवान्तरव्यापारभेदेन निरोधजनने समुच्चय एव न विकल्प"[17] इति।

अन्यान्यपि साधनानि प्रोक्तानि -

२.२ - ईश्वरप्रणिधानम्।

प्रणिधानं नाम भक्तिविशेषः विशिष्टमुपासनं सर्वक्रियाणां ईश्वरे अर्पणं कर्मफलसन्न्यासो वा। तेन प्रसन्नः अभिमुखीकृतः ईश्वरः तम् अनुष्ठातारं अभिध्यानमात्रेण सङ्कल्पमात्रेण अनुगृह्णाति। तस्मादपि अनुष्ठातुः आशु समाधिलाभो भवति।

२.३ - जपः।

तज्जपस्तदर्थभावनम् अर्थात् तस्य ईश्वरवाचकस्य प्रणवस्य सार्धत्रिमात्रिकस्य ओंकारस्य यथावदुच्चारणं जपः। स च तदर्थभावनया प्रणवार्थेश्वरभावनया अलङ्कृतः स्यात्। प्रियनामग्रहणे यथा लोकः प्रसीदति एवं भगवानपि प्रणवजपेन प्रसन्नो भवति। तत्र प्रणवः एव जपनीयः इति नास्ति अन्यदपि रामनाम कृष्णनाम वा जपाय ग्रहीतुं शक्यम्।

२.४ - मैत्र्यादिभावना।

सुखवत्सु मैत्री मित्रता सौहार्दं स्थापनीयं साधु एषां सुखित्वमिति न तु ईर्ष्या। दुखितेषु च कथं नु एषां दुःखनिवृत्तिः स्यादिति करुणाभावः दयाभावः भवेत्। न तत्र ताटस्थ्येन भवितव्यम्। पुण्यवत्सु च हर्षः तद्विपरीतषु च उपेक्षाभावः औदासीन्यं धारणीयम् न तु द्वेषादि। एवं तेषु तेषु तथा भावनया चित्तमलेषु लीनेषु शुक्लो धर्मः चित्तं प्रसादयति। प्रसन्नं च चित्तं आशु ऐकाग्र्यं स्थितिपदं लभते। तदुक्तम् - मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम् इति। गीतायामप्युक्तं -

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति।

प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते।।[18] इत्यादि।

२.५ - प्राणायामः।

प्राणायामोपि अन्यतमः चित्तसमाध्युपायः। रेचकपुरककुम्भकलक्षणेन प्राणायामेन प्राणनिग्रहे प्राणामनसोः सहभावित्वात् चित्तमेव निगृहीतं भवति। अस्य च एकाग्रतायां दोषनिर्हरणद्वेरेणैव सामर्थ्यम्। दोषनिवर्तकत्वं चास्य

इन्द्रियाणां बलं प्राणस्तेषां यत्नेन निग्रहात्।

विक्षेपहेतवोक्षाणां दह्यन्ते दोषराशयः।[19]

तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात्।[20] इत्यादि श्रुतिस्मृतिप्रसद्धिम्।

२.६ - यथाभिमतध्यानम्।

यदेव अभिमतं पुरुषस्य आन्तरं बाह्यं वा हरिहरविग्रहादि तस्यैव आदौ ध्यानं कर्तव्यम्। ध्यानं नाम प्रत्ययैकतानता। तस्मिन्नेव विषये चित्तस्य स्थिरीकरणम्। तत्र लब्धस्थितिकं चित्तम् अन्यत्रापि आशु स्थितिं लभते।

२.७ - क्रियायोगः

क्रिया एव योगः क्रियायोगः। योगसाधनत्वात् योगोपायत्वात् क्रिया योगः इत्युच्यते। तपःस्वाध्यायेश्वरप्राणिधानानि क्रियायोगः। व्यवहारे अस्य प्रभावः वक्तुं शक्यते एव। तपस्यादिभिः संयमः आत्मनिग्रहः सिध्यति। तदा युक्तं कार्यं यथोचितं कर्तुं शक्यते। शान्तमनस्कत्वे एव सर्वं पर्यवसितं भवति। स्वाध्यायो नाम प्रणवादिपवित्राणमन्त्राणां जपः मोक्षशास्त्राध्ययनं वा। साधुग्रन्थाध्ययनेन उत्साहादिलाभः प्रसिद्धो लोके। सर्वक्रियाणां परमगुरावर्पणं कर्मजन्यदृष्टादिफलसन्न्यासो वा ईश्वरप्रणिधानम्। गीतायामपि उच्यते -

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।

लिप्यते न स पापेन पद्मपत्रमिवाम्भसा।।[21]

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा।

निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः।।[22] इत्यादि।

अयमाशयः यत्किञ्चिद्वा कर्तव्यं तत्सर्वं भगवदर्पणबुद्ध्या कर्मजन्यफललिप्सामन्तरेण कर्तव्यम्। तदा दोषः तं न स्पृशति। एतत्सर्वम् अलौकिकम् इति न लोकेपि एवं क्रियते। अधुनापि जनाः यत्किञ्चित् कर्मानुष्ठाय भगवति समर्पयन्ति श्रीकृष्णार्पणमस्तु श्रीरामकृष्णार्पणमस्तु इत्यादि। क्रियायोगानुष्ठानेन च अविद्या अस्मिता रागः द्वेषः अभिनिवेशः इयैते पञ्च क्लेशाः शिथिलीक्रियन्ते। ततो हि आशु समाधिः सिध्यति। तथाहि सूत्रम् – "समाधिभावनार्थः

क्लेशतनूकरणार्थश्च"[23] इति।

२.८ - हठयोगः।

हठयोगः एव घटस्थयोगः इत्युच्यते। एष शरीरसम्बद्धो योगः। घेरण्डसंहिता पूर्णा हठयोगविषयिनी एव।

शोधनं दृढता चैव स्थैर्यं धैर्यं च लाघवम्।

प्रत्यक्षं च निर्लिप्तिं च घटस्थसप्तसाधनम्।। इति एतदभ्यासेन शोधनादयः सप्त भावाः सिद्धाः भवन्ति। तद्य यथा धौतिबस्त्यादिषड्भिः कर्मभिः शरीरस्य शोधनं सिद्धं भवति। कफादिदोषाः निवार्यन्ते। यथा त्रिविधकलापभातिना कफदोषः निवार्यते। तथाह्युक्तं घेरण्डसंहितायाम् -

कपालभातिं त्रिधा कुर्यात् कफदोषं निवारयेत्।।[24] इति

सिद्धपद्मभद्रादीनि आसनानि तेषामभ्यासेन शरीरे दृढता आगच्छति। महामुद्रादिमुद्रया स्थिरता। यथा महामुद्रायाः फले प्रोच्यते -

क्षयकासं गुदावर्तं प्लीहां जीर्णज्वरं तथा।

नाशयेत् सर्वरोगांश्च महामुद्रातिसेवनात्।।[25] इति

प्रत्याहारेण कामादयो रिपवः क्षीयन्ते। एवमन्यत्।

किं बहुना सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते(२.४८) इति समत्वभावः एव योगः। समत्वबुद्ध्या क्रियमाणानि कर्माणि योगपदवीमारोहन्ति। तदा कर्मयोगः सिध्यति। तेन च चित्तशुद्धिः जायते। तदा चित्तं यथाभिमतं चालयितुं समर्थो भवति पुरुषः। अर्जुनेनापि योयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन६.३३ इति साम्यं समत्वमेव योगः इति गृहीतम्। चित्तस्य संयमे सति समता नान्यथा।

दोषादिसमत्ववानेव पुरुषः स्वस्थः इत्यभिहितः आयुर्वेदे। तथाहि सुश्रुतसंहितायां -

समदोषः समाग्निश्च समधातुमलक्रियः।

प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते।।[26] इति।

कामक्रोधौ एव पुरुषं पापाचारे बलादिव नियोजयतः। इन्द्रियनिग्रहः एव तत्रोपायभूतः इति भगवदुपदेशः।

तस्मात्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ

पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्।।[27] इति

स एव योगः। तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणामिति श्रुतिरपि इन्द्रियनिग्रहं योगं कथयति।

आचार्यैः कौटिल्यैरपि उक्तम् अर्थशास्त्रे - कृत्स्नं हि शास्त्रमिदमिन्द्रियजयः इति। अतः चक्षुरादीन्द्रियाणां निग्रहः कर्तव्यः। निग्रहश्च यथाभिमतविषयप्रवृत्तिलक्षणः न तु विषयप्रवृत्तिस्थगनम्।

२.९ - यमनियमौ।

यमनियमौ तावत् समाधेः अङ्गभूतौ। यमं निरूपयन्नाह – अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः इति। तत्र अहिंसा नाम सर्वथा सर्वदा च प्राणिनाम् अपीडनम्। एतन्मूलाः एव अन्ये यमाः नियमाश्च। सा एव परमो धर्मः। तथाह्युक्तं महाभारते - अहिंसा परमो धर्मः इति। अहिंसाप्रतिष्ठायां सत्यां प्रतिष्ठिताहिंससन्निधानात् शाश्वतिकविरोधा अपि अहिनकुलादयः वैरं परित्यजन्ति। यथा दृष्टस्य अनुमितस्य श्रुतस्य वा विषयस्य तथैव कथनं चिन्तनं च सत्यम्। मनोपि तत्र तात्पर्ययुक्तं स्यादित्यर्थः। अतः यदा दृष्टादिविपरीतार्थबोधने तात्पर्यं तदा यथार्था वागसत्या एव यथा अश्वत्थामा हत इति युधिष्ठिरवाक्यम्। सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वं सिध्यति। तद्यथा धार्मिको भूयास्त्वमिति वचनात् संबोध्यो धार्मिको भवति। स्वर्गं प्राप्नुहीति स्वर्गं प्राप्नोति। शास्त्रविधिमुत्सृज्य परतः द्रव्यास्वीकरणम् अस्तेयम्। परदव्यलोभः न स्यादित्यर्थः। प्रतिष्ठितास्तेयो योगी सङ्कल्पमात्रेण सर्वरत्नानि लभते। तथाहि सूत्रम् - "अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्"[28] इति। कायेन मनसा वाचा च स्मरणाद्यष्टविधमैथुनत्यागः ब्रह्मचर्यम्। एतत्प्रतिष्ठायां वीर्यलाभो भवति। वीर्यं नाम सामर्थ्यम्। क्षयादिदोषदर्शनात् विषयाणाम् असंग्रहोपरिग्रहः। अस्य सिद्धौ योगी अतीतवर्तमानभविष्यजन्मनां ज्ञानं लभते।

नियमास्तावत् शौचसन्तोषतपःस्वाध्यायोश्वरप्रणिधानानि। शौचं नाम बाह्यम् आभ्यन्तरञ्च शुचित्वम्। आद्यं मृज्जलादिना अपरञ्च चित्तमलापनयनेन सिध्यति। तत्र उत्तरशौचस्य चित्तशुद्धिद्वारा समाधिः एव फलम्। सन्निहितविषयादधिकस्य प्राप्तौ अलिप्सा सन्तोषः। तस्मिन् सति निरतिशयानन्दावाप्तिः भवति। शीतोष्णादिद्वन्द्वसहनं तपः। तेन चित्तमलाः क्षीयन्ते। स्वाध्यायेन च इष्टदेवतासंप्रयोगो भवति। ईश्वरप्रणिधानेन च अन्तरायाः विनश्यन्ते। एवं लोके यद्यत् प्रार्थ्यते वीर्यादि तत्सर्वं यमादिना एव सिध्यति। अन्ततो गत्वा चित्तशान्तिः एव फलम्। तथाहि भागवते प्रोक्तं -

दानं स्वधर्मो नियमो यमश्च श्रुतं च कर्माणि च सद्व्रतानि।

सर्वे मनोनिग्रहलक्षणान्ताः परो हि योगो मनसः समाधिः।। इति।

यस्त्वविज्ञानवान् भवत्यमनस्कः सदाशुचिः।

न स तत्पदमाप्नोति संसारं चाधिगच्छति।।[29]

इति असमाहितचित्तस्य आत्मप्राप्तिलक्षणलक्ष्याप्राप्तिः प्रोक्ता। एवं लोकेपि नावाप्नोति लक्ष्यममनस्कः। समाहितचित्तस्य तु ध्रुवा लक्ष्यप्राप्तिः - स तु तत्पदमाप्नोति यस्माद्भूयो न जायते

इति काठकश्रुतेः।

चित्तसमाधानात् प्रज्ञा समुपजायते। ततः संस्कारः संस्कारतश्च प्रज्ञेति चक्रम्। स च संस्कारः प्रतिबध्नाति चित्तविक्षेपजनकं संस्कारम्। तथाहि सूत्रं - तज्जः संस्कारोन्यसंस्कारप्रतिबन्धी इति। विक्षेपकसंस्काराणाम् अनुद्बोधे कामादीनामनुत्पत्तिः। ततो न कामादिविषयकचित्तवृत्तिः। एवं भवति शनैः विक्षेपशमनम्। अन्यथा रागद्वेषादिभिः चित्तवृत्तौ सत्यां रागादिवृत्तिजनकसंस्कारजनेः रागादिभावनैव दृढा भवेत्।

उपसंहारः

एवं सर्वथा शास्त्रम् अलौकिकं किञ्चित् प्रतिपादयति इति नास्ति। लोकसम्बन्धिविषयस्य अनिरूपणे व्यर्थमेव स्यात् शास्त्रम्। अलौकिकेन शास्त्रेण किन्नु मम स्यात्। मनः एव सर्वस्य अनर्थप्रचयस्य मूलम्। तदग्रहणे बन्धः तद्विलये च मोक्षः। उक्तं ह्युपनिषदि - "मनः एव मनुष्याणां कारणं बन्धमोक्षयोः"[30] इति। तस्य शमाय एव शास्त्राणि सकलानि प्रवृत्तानि। शान्तमानसस्यैव शास्त्रं करायत्तं भवति। तथाहि उक्तं महाभारते -

शमार्थं सर्वशास्त्राणि विहितानि मनीषिभिः।

स एव सर्वशास्त्रज्ञः यस्य शान्तं मनः सदा।। इति।

शान्तमानसस्य एव सुखम् "अशान्तस्य कुतः सुखमिति"[31] स्मृतेः। सूक्ष्मदृष्ट्या विचारयामश्चेत् जीवने उपागतानां समस्यानां मूलं चित्तस्य असमाधानमेव इति परिलक्ष्यते। मनसि यथा भावः तथा जनानां व्यवहारः। चित्तसमाधानोपायश्च योगः। चित्तसमाधौ आलस्यं संशयः किंकर्तव्यमूठता प्रमादः अवसादः विषादः इत्यादयः सर्वे भावाः अपगताः भवन्ति। समाधिसद्भावे संशयादीनामभावात् व्यवहारः सर्वदा उचितो जायते। अन्यथा तु संशयादिवशंगतः यत्किञ्चित् व्यवहरति। अतः सम्प्रत्यपि विद्यते योगशास्त्रस्य उपयोगिता इति शम्।

आश्रितग्रन्थसूची

1. महर्षिः,पतञ्जलिः,"योगसूत्रम्(षट्टीकोपेतम्)",पण्डित शास्त्री,ढुण्ढिराज,(सम्पादकः),तृतीयसंस्करणम्,चौखम्भा संस्कृत भवन,२००१.
2. महर्षिः,पतञ्जलिः,"पातञ्जलयोगदर्शन",स्वामी,श्रीब्रह्मलीनमुनिः,(सम्पादकः),तृतीयसंस्करणम्,चौखम्भा प्रकाशन,२०१०.
3. महर्षिः,पतञ्जलिः,"पातञ्जलयोगदर्शनम्",कर्णाटक,विमला,(सम्पादिका),प्रथमस्करणम्,रत्ना पब्लिकेशन्स,२०१०.
4. महर्षिः,वाल्मीकिः,"रामायणम्",देवनाथन्,आर्,पाण्डेय,प्रकाश,(सम्पादकौ)द्वितीयसंस्करणम्,परिमल पब्लिकेशन्स,२००६.

5. मिश्रः,वाचस्पतिः,"सांख्यतत्त्वकौमुदी",हरिरामशुक्लः,पण्डितः,(सम्पादकः)प्रथमसंस्करणम्, चौखम्भा प्रकाशन,२०१६.

6. https://sa.wikiquote.org/s/v7

---

[1]रघुवंशम् - १२.८
[2]रामायणम् - २.२१.११
[3]रामायणम् - २.२१.४१
[4] योगसूत्रम् –१४.
[5]श्रीमद्भगवद्गीता - १.२८-३०
[6]योगसूत्रम् - १.३०
[7]श्रीमद्भगवद्गीता - ४.४०
[8]योगसूत्रम् - १.३१
[9]रघुवंशम् १.७५,७६
[10]तत्रैव १.७९
[11]रामायणम् २.१०५.१६
[12]श्रीमद्भगवद्गीता - २.६२,६३
[13]छान्दोग्योपनिषत् १.१.१०
[14]योगसूत्रम् - १.१२
[15] योगसूत्रम् - १. १३
[16]तत्त्ववैशारदी - पेज.२२७
[17]योगवार्तिकम् - पेज.२२८
[18]श्रीमद्भगवद्गीता - २.६४,६५
[19]योगसूत्रम्(षट्टीकोपेतम्) - पेज.४१
[20]अमृतनादोपनिषत् - ७
[21]श्रीमद्भगवद्गीता - ५.१०
[22]तत्रैव – ३.३०
[23] योगसूत्रम् २.२ –
[24]घेरण्डसंहिता १.५६
[25]तत्रैव ३.८
[26] सुश्रुतसंहिता - १.१५.४४
[27]श्रीमद्भगवद्गीता ३.४१
[28]योगसूत्रम् २.३७
[29]कठोपनिषद् - १.३.७
[30] अमृदबिन्दूपनिषत् -१२.
[31] श्रीमद्भगवद्गीता -२६.२

जानकीहरणे कालिदासस्य काव्यभावना

डॉ. प्रीतम-मण्डलः,
सहायकाध्यापकः, पोलवा-महाविद्यालयः, पोलवा, हुगली

सारः- नवनवोन्मेषशालिणीं प्रतिभामुपजीव्य कवयो यद्यपि नवनवकाव्यानि विरचयन्ति तथापि तेषां रचनासु किमपि सादृश्यं समापतति। वस्तुतः कवयः प्रायशः पूर्ववर्तिकविरचनाप्रभावेन प्रभावान्विताः भवन्ति। भाषाभावच्छन्दोऽलंकारशैलीप्रभृतिषु कवीनां स्वकीया चिन्ताधारा यद्यपि तिष्ठति तथापि सम्यक् निरीक्षणेन अवगम्यते यत् यस्य कस्यचित् रचनाक्षेत्रेऽन्येषां पूर्वाचार्याणां प्रभावः क्वचित् क्वचित् परिलक्ष्यते। एवं कुमारदासस्योपरि पूर्ववर्तिकालिदासस्य प्रभावः दृश्यते। अधुनात्र कुमारदासस्य जानकीहरणमहाकाव्ये प्रतिफलिताः कालिदासस्य प्रभावाः समासेन उपस्थाप्यन्ते।

कुञ्चिकाशब्दाः- कुमारदासः, जानकीहरणम्, कालिदासः, रघुवंशम्, कुमारसम्भवम्, मेघदूतम्, अभिज्ञानशकुन्तलम्, प्रभावाः, सादृश्यानि

मूलम्- कालिदासोत्तरकालिकेषु महाकाव्यरचयितृषु कुमारदासोऽन्यतमः। कविनानेन विंशतिसर्गेषु विभक्तं जानकीहरणम् इति महाकाव्यं व्यरचि। आदिकविवाल्मीकिविरचितं श्रीमद्रामायणमेव काव्यस्यास्य उपजीव्यत्वेन स्वीकृयते। अपि च कविरयं महाकविकालिदासं सर्वथा अनुचकार स्वकाव्यनिर्माणावसरे। यद्यपि रघुवंशम्, कुमारसम्भवम्, मेघदूतम्, अभिज्ञानशकुन्तलम् इति ग्रन्थचतुष्टयस्य प्रभावःकुमारदासस्य जानकीहरणे दृश्यते तथापि रघुवंशम् इति महाकाव्यस्य प्रभावः जानकीहरणे सर्वाधिकः प्राप्तरूपः परिलक्ष्यते। अतः उभयोरेव कविवरयोः कालिदासकुमारदासयोः रचनासु आख्यानगतं भावगतं श्लोकगतं कल्पनागतं वा सादृश्यं परिप्राप्यते। अधुनात्र तयोः कविकर्मसु प्राप्यमाणानां सादृश्यानां सामासिकं चित्रमेकं चित्रयितुं यत्यते।

अयोध्यायाः ततश्च महाराजस्य दशरथस्य दिग्विजयस्य वर्णनेन जानकीहरणमहाकाव्यं प्रारभते। रघुवंशमहाकाव्ये षोडशसर्गे अयोध्यालक्ष्म्याः आक्षेपमाध्यमेन अयोध्यायाः प्रासादः,

राजपथः, दीर्घिका, उद्यानमित्यादयः विषयाः प्रकारान्तरेण वर्णिताः।[1] रघुवंशस्य अयोध्यावर्णनेन सह जानकीहरणस्य अयोध्यावर्णनम् अंशतः समतामेति।

दिङ्मात्रमुदाहरणं यथा-

'निशासु भास्वत्कलनुपूराणां यः सञ्चरोऽभूदभिसारिकाणाम्।

नदन्मुखोल्काविचितामिषाभिः स वाह्यते राजपथः शिवाभिः॥'[2]

इति रघुवंशान्तर्गतश्लोके सुसमृद्धायाम् अयोध्यायाम् अभिसारिकाणामवस्था कथिता। जानकीहरणेऽपि तासामवस्थां वर्णयता कविना निगदितम्-

'कृत्वापि सर्वस्य मुदं समृद्ध्या हर्षाय नाभूदभिसारिकाणाम्।
निशासु या काञ्चनतोरणस्थरत्नांशुभिर्भिन्नतमिस्त्रराशिः॥'[3] इति।

अपि च मेघदूते अलकावर्णनस्य प्रतिबिम्बनं जानकीहरणस्य अयोध्यानगरीवर्णनायां विलोक्यते। तद्यथा-

'अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः।
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः॥'[4]

इत्यस्मिन् श्लोकार्धे आकांशस्पर्शिनां प्रासादानाम् उल्लेखः कालिदासेन विहितः। कुमारदासेनापि अयोध्यावर्णनकाले तादृशप्रासादं वर्णयता उक्तम्-

'चीनांशुकैरभ्रलिहामुदग्रशृङ्गाग्रभागोपहितैर्गृहाणाम्।'[5] इति।

रघुवंशे दशरथस्य दिग्विजयः[6] पञ्चभिः श्लोकैः संक्षेपेण वर्णितः। जानकीहरणे विषयेऽस्मन् विस्तृतं वर्णनं विहितम्।[7] दिग्विजयवर्णनविषये दशरथमपेक्षया रघोः दिग्विजयवर्णनेन[8] कुमारदासः प्रभावित आसीत्। तद्यथा-

पृथिवीं जिगीषोः रघोः आदौ पूर्वदिशं प्रति गमनम्[9], पूर्वसागरं प्रति सैन्यानां सरणम्[10], यवनस्योल्लेखः[11] चेत्यादिविषयाः जानकीहरणेऽपि दशरथस्य दिग्विजयकाले[12] प्रसङ्गतः उल्लिखिताः।

रघुवंशे जानकीहरणे च दशरथस्य मृगयायाः वर्णनं विस्तृतेन विहितम्।[13] उभयत्र वर्णना प्रायेण तुल्यरूपता प्राप्ता। तद्यथा-

'लक्ष्मीकृतस्य हरिणस्य हरिप्रभावः प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहम्।

आकर्णकृष्टमपि कामितया स धन्वी वाणं कृपामृदुमनाः प्रतिसंजहार।।'[14]

इत्यस्मिन् रघुवंशान्तर्गतश्लोके हरिणयुगलं निरीक्ष्य करुणार्द्रचित्तः दशरथः मृगप्रहारकार्यात् आत्मनः अभिलाषं दुरीचकार। इयञ्च कालिदासवर्णना अनुरूपयैव रीत्या वाणीरूपमासादिता जानकीहरणे। तथा चोक्तं कुमारदासेन-

'अन्योन्ववक्त्रार्पितपल्लवाग्रग्रासं नृवीरस्य कुरङ्गयुग्मम्।
प्रियानुनीतौ भृशमिष्टचाटुचेष्टस्य घाताभिरतिं निरासे।।'[15] इति।

रघुवंशे दशमसर्गे रावणोत्पीडनात् मुक्तिलाभाय देवतानां विष्णुं प्रति गमनम्, विष्णोः वर्णम्, देवानां विष्णुस्तुतिश्चेत्यादयः वर्णिताः।[16] कुमारसम्भवे द्वितीयसर्गे तारकासुरस्य अत्याचारेण क्लिष्टानां देवानां ब्रह्मणः सविधे गमनादिवृत्तान्तः वर्णितः।[17] उक्तमहाकाव्यद्वये उल्लिखितस्य वर्णनस्य प्रतिबिम्बनमालोक्यते जानकीहरणे द्वितीयसर्गे।[18] तद्यथा कुमारसम्भवे द्वितीयसर्गे दृश्यते यत् पुरतः इन्द्रदेवं स्थापयित्वा देवाः ब्रह्मणः सविधे जग्मुः। तथोक्तं कालिदासेन-

'तस्मिन्विप्रकृताः काले तारकेण दिवौकसः।
तुरासाहं पुरोधाय धाम स्वायंभुवं ययुः।।'[19] इति।

रघुवंशेऽपि कथितम्-

'तस्मिन्नवसरे देवाः पौलस्त्योपप्लुता हरिम्।
अभिजग्मुर्निदाघार्ताश्छायावृक्षमिवाध्वगाः।।'[20] इति।

जानकीहरणेऽपि विष्णुं निकषा देवतानां गमनकाले समैव वर्णिना समुपलभ्यते-

'रावणेन रणे भग्ना देवा दावाग्नितेजसा।
द्रष्टुं जगत्पतिं जग्मुः पुरस्कृतपुरन्दराः।।'[21] इति

रघुवंशे प्रथमसर्गे वशिष्ठमुनेः तपोवनस्य संक्षिप्तवर्णनायां[22] मुनिकन्याभिः वृक्षादीनां परिपालनम्[23], ऋषिपत्नीमृगयोः सस्नेहसम्पर्कः[24], यज्ञोत्थितधूमैः आश्रमस्य पवित्रतासम्पादनम्[25] इत्यादयः विषयाः यथा परिदृश्यन्ते तथैव जानकीहरणे पञ्चमसर्गे विश्वामित्रस्य तपोवनवर्णनायां[26] कालिदासस्य तपोवनवर्णनस्य प्रतिबिम्बनमालोक्यते।

अभिज्ञानशकुन्तलमिति नाटकस्य चतुर्थेऽङ्के शकुन्तलायाः पतिगृहगमनकालीनं यद्वर्णनं समाचरितं प्रायेण तदनुरूपमालेख्यं चित्रितमालोक्यते जानकीहरणस्य नवमसर्गे सीतायाः

पतिगृहगमनकाले।[27] तद्यथा- शकुन्तलायाः पतिगृहयात्रासमये तस्यै महर्षिकाश्यपेन सुगृहिनी-कर्तव्योपदेशः प्रदत्तः। तथाहि कालिदासेन भणितम्-

'शुश्रुषस्व गुरुन् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः।

भूयिष्टं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।।'[28] इति।

अस्यानुरूपो भावो यथा जानकीहरणे-

'गतापि भर्त्रे परिकोपमायतं गिरः कृथा मा परुषार्थदीपनीः।
कुलस्त्रियो भर्तृजनस्य भर्त्सने परं हि मौनं प्रवदन्ति साधनम्।।'[29] इति।

अपि च अभिज्ञानशकुन्तले पालितकन्यायाः शकुन्तलायाः पतिगृहगमनावसरे विरहविध्वस्तचेतसः पितुः कन्वस्य करुणावस्थां वर्णयता कालिदासेन निगदितम्-

'यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।

वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्योकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुखैर्नवैः।।'[30] इति।

जानकीहरणेऽपि भावोऽयं प्राप्तरूपः परिदृश्यते। तथा चोच्यते कुमारदासेन-

'अयं त्वदेकप्रवणो मनोरथो वृथाऽद्य दैवादपि नाम नो भवेत्।
इति प्रवक्तुर्जरतो निरासिरे निगृह्य कण्टं वचनापि मन्युना।।'[31] इति।

रघुवंशमहाकाव्ये[32] नगरं प्रविशतोः अजेन्दुमत्योः कुमारसम्भवे[33] च परिहितपरिणयवेशस्य महेश्वरस्य दर्शनव्यापारे नारीणां यथैत्सुक्यादिरेकस्तथैव रामचन्द्रदर्शनविधावपि अयोध्या-पुरङ्गनानां व्यग्रता नो नयनपथमेति।[34] तादृशमौत्सुक्यं प्रकाशयता कालिदासेन रघुवंशे एकस्मिन् श्लोके निगदितम्-

'ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु।
बभूवुरित्थं पुरसुन्दरीणां त्यक्तान्यकार्याणि विचेष्टितानि।।'[35] इति।

कुमारसम्भवेऽपि कालिदासेनोच्यते-

'तस्मिन् मुहूर्ते पुरसुन्दरीणामीशानसन्दर्शनलालसानाम्।
प्रासादमालासु बभूवुरित्थं त्यक्तान्यकार्याणि विचेष्टितानि।।'[36] इति।

उल्लिखितकालिदासवर्णना अनुरूपयैव रीत्या वाणीरूपमासादिता जानकीहरणे। तथा चोक्तं कुमारदासेन-

'गुरूनपृष्टैव कुमारमीक्षितुं जवेन वातायनमीयुरङ्गनाः।
न ता न सत्यो न च मुदवृत्तयस्तथाहि वंशस्य रघोर्विनीतता।।'[37] इति।

जानकीहरणस्य अष्टमसर्गे वर्णितं रामसीतयोः सम्भोगचित्रं[38] कुमारसम्भवस्य अष्टमसर्गवर्णितेन हरपार्वत्याः सम्भोगचित्रेण[39] सह सादृश्यावहम्। अपि च जानकीहरणे मन्दोदरयाः विलापवर्णनायां[40] कुमारसम्भववर्णितस्य रतिविलापस्य[41] प्रभावो बाहुल्येनालोक्यते।

अधुना कालिदासकुमारदासयोः काव्येषु समुपलभ्यमानानां भावगतसादृश्यानां कल्पनासाम्यानां शैलीगतसादृश्यानाञ्च कतिचिदत्र समुल्लिख्यन्ते-

कालिदासः	**कुमारदासः**
1. 'अतः सोऽभ्यन्तरान् नित्यान् षट् पूर्वमजयद्रिपुन्'[42]	1. 'स षड्द्विषः पुर्वमसौ विजिग्ये'[43]
2. 'आपीनभारोद्वहनप्रयत्वात्'[44]	2. 'स्तनद्वयस्योद्वहनश्रमेण'[45]
3. 'भित्वा निराक्रामदरालकेश्याः'[46]	3. 'अरालकेश्या अलके विधात्रा'[47]
4. 'शापोऽण्यदृष्टतनयाननपद्मशोभे'[48]	4. 'अदृष्टपुत्राननवन्ध्यादृष्टिः'[49]
5. 'ततो मृगेन्द्रस्य मृगेन्द्रगामी'[50]	5. 'मृगेन्द्रगामी मृगयां जगाम'[51]
6. 'पुत्रीकृतोऽसौ वृषभध्वजेन'[52]	6. 'पुत्रीकृतानी श्वरया शिशुत्वे'[53]
7. 'अभिज्यधन्व विचचार दावम्'[54]	7. 'अधिज्यधन्वा धनदप्रभावः'[55]
8. 'वन्यस्य नेत्रविवरे महिषस्य मुक्तः'[56]	8. 'मध्येललाटं महिषस्य मुक्तः'[57]
9. 'अथ प्रजानामधिपः प्रभाते'[58]	9. 'प्रभुः प्रजानामथ स प्रभाते'[59]
10. 'वधाय वध्यस्य शरं शरण्यः'[60]	10. 'शरं शरण्येऽपि मुमोच बाले'[61]
11. 'तत्र स द्विरदवृंहितशङ्की'[62]	11. 'श्रुत्वा रवं वृंहितनादशङ्की'[63]
12. 'लज्जा तिरश्चां यदि चेतसि स्या- दसंशयं पर्वतराजतुल्याः। तं केशपाशं प्रसमीक्ष्य कुर्यु- र्बालाप्रियत्वं शिथिलं चमर्यः।।'[64]	12. 'तत् केशपाशावजितात्मबर्ह- भारस्य वासः शिखिनो वनेषु। चक्रे जनस्य स्पृशतीति शङ्कां चेतस्तिरश्चामपि जातु लज्जाम्।।'[65]
13. 'भोगिभोगासनासीनम्'[66]	13. 'भोगिभोगासनक्षोभः'[67]
14. 'श्रियः पद्मनिषण्यायाः क्षौमान्तरितमेखले। अङ्के निक्षिप्तचरणमास्तीर्णकरपल्लवे।'[68]	14. 'स्वमुखे सञ्चरद्दृष्टेरङ्कविन्यस्तपार्ष्णिना। स्पृशन्तं पादपद्मेन पद्माया नाभिमण्डले।।'[69]

15. 'यात्येकतोऽस्तशिखरं पतिरोषधीनाम् आविष्कृतोऽरुणपुरः सर एकतोऽर्कः। तेजोद्वयस्य युगपद्व्यसोदयाभ्यं लोको नियम्यत इवैष दशान्तरेषु।।'[70]	15. 'नूनं पती स्थावरजङ्गमानां पर्यायविश्रासपरार्थतन्त्रौ। एकत्र मज्जत्यधिवारि सिन्धो- रन्यो जहौ तत्कमलाकराम्भः।।'[71]
16. 'सुगन्धिनिश्वासविवृद्धतृषाम्'[72]	16. 'सुगन्धिनिश्वासगुणावकृष्टम्'[73]
17. 'सृजती वाष्पमिवाञ्जनविलम्'[74]	17. 'स्थूलानिवोढाञ्जनवाष्पबिन्दुन्'[75]
18. 'अकालसन्ध्यामिव धातुमन्ताम्'[76]	18. 'सन्ध्यामकालघटितां गगने विनेतुः'[77]
19. 'नृत्यत् कबन्धं समरे ददर्श'[78]	19. 'समरपटहकोषे तत्र नृत्तं कवन्धैः'[79]
20. 'प्रजानामेव भूत्यर्थं स ताभ्यो वलिमग्रहीत्। सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।।'[80]	20. 'आदाय करमादयेभ्यः कीकटेष्वपि वर्षसि। प्रपीय वाहि सिन्युभ्यः स्थलेष्विव घनाधनः।।'[81]
21. 'स्वरेण तस्याममृतस्रुतेव प्रजल्पितायामभिजातवालि। अप्यन्यपुष्टा प्रतिकुलशब्दा श्रोतुर्वितन्त्रीरिव ताड्यमाना।।'[82]	21. 'तन्व्या मनोज्ञस्वरनैपुणेन विनिर्जितो रोषविलोहिताक्षः प्रसक्तचिन्ताऽऽहितमन्यपुष्टः शोकेन कार्ष्ण्यं वहतीति मन्ये।।'[83]
22. 'ज्ञातमन्मथरसाः शनैः शनैः'[84]	22. 'ज्ञानमन्मथरसा मदातुरे'[85]
23. 'शिक्षितं युवतिनैपुणं तया'[86]	23. 'शिक्षितुं युवतिकृत्यनैपुण्यम्'[87]
24. 'पृथिवीं शासतस्तस्य पाकशासनतेजसः। किञ्चिदूनमनूनर्द्धेः शरदामयूतं ययौ।।'[88]	24. 'ततो नयेन नयतो राज्यं राजीनचक्षुषः। तस्य शक्रसमानस्य समानामयुतं ययौ।।'[89]
25. 'पलितच्छद्मना जरा'[90]	25. 'पलितच्छद्मना दोषा'[91]
26. 'प्रतिवध्नाति हि श्रेयः पुज्यपुजाव्यतिक्रमः'[92]	26. 'दुषयिष्यति पुज्येषु पुजावैमुख्यमायतिम्।'[93]
27. 'एवं वादिनि देवर्षो पार्श्वे पितुरधोमुखी'[94]	27. 'इत्थं वादिनि राजेन्द्र रामो मौनमधिश्रितः'[95]
28. 'प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम्'[96]	28. 'जनस्य चेतो दधतः समुन्नतं रूषः। प्रणिपातविधिः प्रतिक्रिया।।'[97]

सर्वान्तिमे समीक्षाया अस्याः फलरूपेण अस्माकं मनसि एतदापतितं यत् जानकीहरणमहाकाव्यस्य प्रकल्पने कालिदासप्रमुखानां पूर्ववर्तिकवीनां प्रभावविशेषो यद्यपि परिलक्ष्यते तथापि तेषां सर्वेषां प्रभावमात्मसात् कृत्वालोकसामान्यप्रतिभाप्रभया विराजमानेन महाकविना कुमारदासेनाभिनवतया काव्यमिदं विरचितम्।

सन्दर्भाः

[1] जानकीहरणम्, १६/१-२१
[2] रघुवंशम्,१६/१२
[3] जानकीहरणम्, १/३
[4] मेघदूतम्, उत्तरमेघः, १
[5] जानकीहरणम्, १/४
[6] रघुवंशम्,९/९-१३
[7] जानकीहरणम्, १/१६-२५
[8] रघुवंशम्,४/२८-८५
[9] तत्रैव, ४/२८
[10] तत्रैव, ४/३२
[11] तत्रैव, ४/६१
[12] जानकीहरणम्, १/१६,१७, १९
[13] रघुवंशम्,९/४८-७३
जानकीहरणम्, १/४५-७४
[14] रघुवंशम्,९/५७
[15] जानकीहरणम्, १/५७
[16] रघुवंशम्,१०/५-४९
[17] कुमारसम्भवम्, २/१
[18] जानकीहरणम्, २/१-७९
[19] कुमारसम्भवम्., २/१
[20] रघुवंशम्,१०/५
[21] जानकीहरणम्, २/१
[22] रघुवंशम्,१/४९-५३
[23] तत्रैव, १/५१
[24] तत्रैव, १/५०
[25] तत्रैव, १/५३
[26] जानकीहरणम्, ५/१-२४,५/१,५/६,५/५
[27] तत्रैव, ९/२-११
[28] अभिज्ञानशकुन्तलम्, ४/१८
[29] जानकीहरणम्, ९/६
[30] अभिज्ञानशकुन्तलम्, ४/६
[31] जानकीहरणम्, ९/९
[32] रघुवंशम्,७/५-१२
[33] कुमारसम्भवम्, ७/५६-६१
[34] जानकीहरणम्, ९/५२-६२
[35] रघुवंशम्,७/५
[36] कुमारसम्भवम्, ७/५६
[37] जानकीहरणम्, 9/52९/५२

[38] तत्रैव, 8/1-54८/१-५४
[39] कुमारसम्भवम्, ०८/१-२७
[40] जानकीहरणम्, १९/३२-५१
[41] कुमारसम्भवम्, ४/२-३८
[42] रघुवंशम्,१७/४५
[43] जानकीहरणम्, १/१४
[44] रघुवंशम्, २/१८
[45] जानकीहरणम्, १/३२
[46] रघुवंशम्, ६/८१
[47] जानकीहरणम्, १/३३
[48] रघुवंशम्, ९/८०
[49] जानकीहरणम्, १/४४
[50] रघुवंशम्,२/३०
[51] जानकीहरणम्, १/४६
[52] रघुवंशम्,२/३६
[53] जानकीहरणम्, १/४७
[54] रघुवंशम्,२/८
[55] जानकीहरणम्, १/५२
[56] रघुवंशम्,९/६१
[57] जानकीहरणम्, १/५९
[58] रघुवंशम्,२/१
[59] जानकीहरणम्, १/७०
[60] रघुवंशम्,२/३०
[61] जानकीहरणम्, १/७४
[62] रघुवंशम्,९/७३
[63] जानकीहरणम्, १/७४
[64] कुमारसम्भवम्, १/४८
[65] जानकीहरणम्, १/४१
[66] रघुवंशम्,१०/७
[67] जानकीहरणम्, २/५
[68] रघुवंशम्,१०/८
[69] जानकीहरणम्, २/७
[70] अभिज्ञानशकुन्तलम्,४/२
[71] जानकीहरणम्, ३/५९
[72] कुमारसम्भवम्, ३/५६
[73] जानकीहरणम्, ३/४५
[74] रघुवंशम्,८/३५
[75] जानकीहरणम्, ३/५८
[76] कुमारसम्भवम्, १/४
[77] जानकीहरणम्, ५/५८

[78] रघुवंशम्,७/५१
[79] जानकीहरणम्, ५/५६
[80] रघुवंशम्,१/१८
[81] जानकीहरणम्, ६/३८
[82] कुमारसम्भवम्, १/४५
[83] जानकीहरणम्, ७/१७
[84] कुमारसम्भवम्, ८/१३
[85] जानकीहरणम्, ८/२६
[86] कुमारसम्भवम्, ८/१७
[87] जानकीहरणम्, ८/२९
[88] रघुवंशम्,१०/१
[89] जानकीहरणम्, १०/१
[90] रघुवंशम्,१२/२
[91] जानकीहरणम्, १०/३
[92] रघुवंशम्,१/७९
[93] जानकीहरणम्, १०/६५
[94] कुमारसम्भवम्, ६/८४
[95] जानकीहरणम्, १०/४२
[96] रघुवंशम्, ४/६४
[97] जानकीहरणम्, ९२/५२

अनुशीलितग्रन्थसूची

संस्कृतभाषानिबद्धाः ग्रन्थाः

- कुमारदासः, जानकीहरणम्, सम्पा. जि.कृष्णप्रसादः, बेङ्गलुरु: विद्याधीशस्नातकोत्तरसंस्कृतशोधकेन्द्रम्, २०१५.
- दाहालः, आचार्यः लोकमणिः, संस्कृतसाहित्येतिहासः, वाराणसी: चौषम्बा कृष्णदास अकादेमी, २०११ (चतुर्थसंस्करणम्).
- वन्द्योपाध्यायः, धीरेन्द्रनाथः, संस्कृतवाङ्मयस्य इतिहासः, कलिकाता: संस्कृत-पुस्तक-भाण्डारः, २०१४ (प्रथमसंस्करणम्).
- वाल्मीकिः, रामायणम्, सम्पा. वासुदेवलक्षणशास्त्रीपणशीकरः, मुम्बई: पाण्डुरङ्ग जावजी, १९३० (चतुर्थसंस्करणम्).

हिन्दीभाषानिबद्धाः ग्रन्थाः

- उपाध्याय, आचार्य बलदेव, संस्कृत साहितय का इतिहास, वाराणसी: शारदा निकेतन, २००१.
- कालिदास, रघुवंशम्, सम्पा. कृष्णमणि त्रिपाठी, वाराणसी: चौखम्बा सुरभारती प्रकाशन, २०१४ (प्रथमसंस्करणम्).
- कुमारदास, जानकीहरणम्, सम्पा. श्रीकृष्णदास, इलाहवाद: मित्र प्रकाशन प्राइवेट लिमिटेड, १९६६ (प्रथम संस्करण).

बङ्गभाषानिबद्धाः ग्रन्थाः

- कालिदास, अभिज्ञानशकुन्तलम्, सम्पा. श्रीसत्यनारायण चक्रवर्ती, कलकाताः संस्कृत पुस्तक भाण्डार, २००८ (षष्ठ संस्करण, चतुर्थ मुद्रण).

- वन्द्योपाध्याय, धीरेन्द्रनाथ, संस्कृत साहित्येर इतिहास, कलकाता: पश्चिमवङ्ग राज्य पुस्तक पर्षत्, २००९ (द्वितीय संस्करण, तृतीय मुद्रण).

आङ्गलभाषानिबद्धाः ग्रन्थाः

- Kalidas.2005. *Raghuvamsa* (*The Raghuvamsa of Kalidas*. Ed. Kasinath Pandurang Parab.New Delhi: Cosmo Publications. (1st Edition).
- Krishnamachariar, M. 1989. *History of Classical Sanskrit Literature*. Delhi:Motilal Banrsidass. (Reprint of 3rd Edition, 1974).
- Keith, A. Berriedale.2010. *A History of Sanskrit Literature*. Delhi:Motilal Banarsidass Publishers Pvt. Ltd. (Reprint of 1st Edition, 1993).
- Kumardass.1977. *Janakiharana (Janakiharanam of Kumardasa)*. Ed. Dr. V. Raghavan. Delhi: Motilal BanarasiDass. (1st Edition).
- Kumardass.1907. *Janakiharana*. Ed. Gopal Raghunath Nandarikar. Bombay:Luzac and Co. (1st Edition).
- Kumardass.1908. *Janakiharana (The Janakiharana of Kumardasa)*. Ed. Shastree Narayan Vasudeva Nigudkar. Bombay: The Oriental Publishing Co. (1st Edition).

भीमायनम् काव्यगुणेन सत्याग्रहान्दोलनस्य एकमालेख्यम्

डॉ प्रियाङ्का साहा

सहकारी अध्यापक:, वहरमपुरबालिकामहाविद्यालय:

प्रबन्धसार:

विंशशतकस्य प्राध्यापक: डॉ प्रभाशङ्करजोशिना विरचितं 'भीमायनम्' जीवनीमूलकं चरितकाव्यम्। काव्यस्यास्य सर्गाणामुपसर्गाणां च नामकरणमनवद्यम्। एतदपि लेखकस्य बहव: ग्रन्था: आसन्। संस्कृतसाहित्ये श्लोकाकारेण बाबासाहेवस्य आत्मकथामूलकं काव्यमिदमपूर्वम्। रामायणादिमहाकाव्याद् विलक्षणरसादियुक्तं काव्यमिदमाधुनिकम्। यद्यपि पाठकमनसे अयं वीररसात्मक: इति स्वदते। 'नाटकं ख्यातवृत्तं स्यात्' इत्युक्ते'पि प्रबोधचन्द्रोदयस्य मृच्छकटिकस्य वा नायक: रामायणख्यात: महाभारतख्यात: वा नास्ति, किन्तु आदिपदेन कश्चिदपि नायक: अत्र गृह्यते। प्राचीने महाकाव्ये चरित्रेषु दिव्यभाव: परिलक्ष्यते। 'भीमायनम्' इति महाकाव्ये तु नायक: साधारण: जन:।

अतः प्राचीनसाहित्यस्य तथाकथितानां नायकानां नायिकानां च गुणाः सर्वथा न सङ्गता: भविष्यन्ति।। अतः कश्चन लक्षणभेदः अवशिष्यते। पाणिनिविरोधिभाषायाः प्रयोगेऽपि साहित्यकाराः तस्याः स्वागतं कृतवन्तः । लेखे एतस्य विषये चर्चा भविष्यति। विभावानुभावव्याभिचारिभावै: सह स्थायिभावस्य संयोगेन रसोत्पत्ति: स्यादिति अलङ्करशास्त्रे उक्तम्। पश्चात् विरोधस्य स्थायिभाव: रसे पर्यवसित:। विभाव:, अनुभाव:, व्यभिचारि च व्यक्तः विक्षोभरसस्य प्रस्तुतिः च प्रदेशमूलके अस्मिन् उत्तमवर्गरचनायां चर्चा कृता। अपि च अतीव अन्तिमं संक्षेपेण अलङ्कारस्य तथा शब्दालङ्कारस्य प्रयोग: लक्षणसमन्वय: चेति दर्शित:।

कुञ्चिशब्दा: काव्यशास्त्रम्, सत्याग्रहान्दोलनम्, कविकृतित्वम्, भीमायनम्।

प्रबन्धविषय:

कविरूपरेखा तथा उपलब्धयः : 'भीमायनम्' इति संस्कृतसाहित्यस्य २० शताब्द्याः विद्वान् प्राध्यापकप्रभाकरशंकरजोशी इत्यनेन लिखितं जीवनीकाव्यम् । काव्य डॉ. भीमरबः रामजी अम्बेडकरस्य आत्मकथात्मकमस्ति । लेखकः प्राध्यापकः जोशिना २०११ तमे वर्षे एतत् पुस्तकं

प्रकाशितम् । तस्य जन्म १९२५ तमस्य वर्षस्य जनवरी-मासस्य १६ दिनाङ्के महाराष्ट्रस्य पुणे-नगरे अभवत् । तस्य पितुः नाम शंकर जोशी । प्राध्यापक जोशी इत्यस्य प्रारम्भिकशिक्षा पुणेनगरे सम्पन्नम् । लेखकः प्रायः चत्वारिंशत् वर्षाणि शिक्षायां (ई. १९४४ तः १९८४ ई. पर्यन्तं) प्राध्यापकः, पर्यवेक्षकः, प्राचार्यः, प्राध्यापकः इत्यादिषु विभिन्नेषु भूमिकासु व्यतीतवान्। सः द्विवर्षपर्यन्तं पर्यवेक्षकः, सप्तदशवर्षपर्यन्तं प्राचार्यः, पञ्चवर्षपर्यन्तं प्राध्यापकः, त्रीणि वर्षाणि प्राचार्यः आसीत्। सः पञ्चदशवर्षपर्यन्तं तिलक-महाराष्ट्र विद्यापीठे मानद-प्रोफेसररूपेण कार्यं कृतवान्। सः पुणे-नगरस्य तिलक-महाराष्ट्रात् 'व्याकरणविशारद:' इति उपाधिं प्राप्तवान्। पुणेनगरस्य सभाया: 'काव्यकोविद्' इति, कलिकाता विश्वविद्यालयात् 'काव्यतीर्थ:' इति उपाधिं प्राप्तवान्।

'भीमायनम्' इत्येतदतिरिक्तं कविः कथासरित्सागराश्रितं 'कथासंग्रहदशकम्', 'संस्कृतपाठ्यपुस्तकानि', 'सकलनाट्यवचनस्पर्धार्थम्', संस्कृतविषये गद्य-काव्य-माला, 'संस्कृतविहार:', 'सुलभ-संस्कृत-व्याकरणम्' इत्यादयः उल्लेखनीयाः ग्रन्थाः रचिताः सन्ति । आजीवनं शिक्षायां कार्यस्य 'सत्कारपुरस्कारः', श्रेष्ठसंस्कृतशिक्षकस्य 'अगशेपुरस्कारः', शिक्षासेवायाम् 'राष्ट्रपतिपुरस्कारः', महाराष्ट्रराज्येन २००७-०८ तमे वर्षे 'कालिदासपुरस्कारः' इत्येव पुरस्कृतः ।

भीमायनम्' महाकाव्यं प्रो जोशी इत्यस्य महती उपलब्धिः अस्ति। प्रायः वर्षत्रयं यावत् सः भीमरवस्य चरित्रम् अधीतवान् । तदनन्तरं कतिपयेषु दिनेषु तस्य दृष्टिदोषः इति निदानं जातम् । तस्मिन् परिस्थितौ अपि सः पुस्तकस्य पठनं न त्यक्तवान् । एतस्मिन् समये सः 'मानवो'स्ति प्रधानो जगत्यस्मिन्न संशयम्' इति गभीरमनुभवति स्म । ततः शीघ्रमेव सः अन्धः भूत्वा अतीव विषादग्रस्तः अभवत् । तस्य मनः भग्नम् आसीत्। दृष्टिरहितं चरित्रचित्रणं असम्भवं दृश्यते। यथा अन्नपानं विना शरीरस्य निर्वाहः असम्भवः, तथैव कार्यं विना कालान्तरं कविः असह्यम् इव भासते । सः विषादग्रस्तः, भ्रान्तः च अभवत् । एतादृशानां व्यसनानां सम्मुखे'पि कष्टव्याधिना पीडितः अपि सन् सः भीमरवस्य जीवनवृत्तान्तलेखनस्य आग्रहं प्रतिरोधयितुं न शक्तवान् । डॉ. जोशिना त्रिवर्षस्य दीर्घप्रयत्नं कृतम्। अम्बेडकरस्य जीवनवृत्तान्तं संस्कृतभाषया अनुवादं कर्तुं समर्थः अभवत् । विभिन्नानां संस्कृतप्रेमिणां साहाय्येन सः अन्ततः लेखने निपुणतां प्राप्तवान्, तत् पुस्तकरूपेण प्रकाशयितुं समर्थः अभवत् ।

ग्रन्थपरिचय:

'भीमायनम्' महाकाव्यमेकविंशतिसर्गेषु रचितमस्ति। भीमरवस्य सम्पूर्णजीवनवृत्तान्तमर्थात् जन्मतः महापरिनिर्वाणपर्यन्तं कथा। अम्बेडकरस्य पुण्यतिथिः महापरिनिर्वाणदिवसः इति आचर्यते। अत्र श्लोकसंख्या प्रायेण १६००। शंकरपुत्र प्रभाकर जोशिना सावधानीपूर्वकं ग्रन्थमिदं रचनान्तरम् डॉ. अम्बेडकराय आत्मसमर्पणं कृतवान् । अर्पणपत्रे लेखकः अवदत् - भीमः पितुः निर्देशानुसारं संस्कृतविद्यालये अध्ययनं कुर्वन्। किन्तु केनचित् कट्टरसंस्कृतशिक्षकेन सभायां वारितः। प्रत्यागमने अतीव विषादः सन् सः एकस्मिन् दिने संस्कृतस्य महतीं ज्ञानं प्राप्नुयात् इति आत्मनः प्रतिज्ञां कृतवान् । अवसरः अपि आगच्छति। सः एकस्मै विद्वान् संस्कृतविद्भ्यः स्वेच्छानुसारं रामायणग्रन्थं बहुवारं पठितवान् । तेन संसदे संस्कृतं 'राज्यभाषा' इति प्रस्तावितः। तस्य संस्कृत-उच्चारणं श्रुत्वा सांसदाः स्तब्धाः अभवन् । स्मृतिशास्त्रकाराणां मनु, भारद्वाज, पराशर इत्यादीनां प्रमुखानां रचितानां ग्रन्थानां सम्पूर्णपाठं सम्पन्नं कृत्वा एव हिन्दुसंहिता रचयत्।[१] सः संसदे नवो मनु' इति उपाधिं प्राप्तवान् । एकदा गुरुभि: प्रशालायां वारितस्य भीमस्य दिव्यभाषां बहु सावधानीपूर्वकं गौरवगाथां संस्कृतभाषया रचयित्वा कविः जोशी 'भीमाय बिनयेन' इति काव्यं हर्षेण समर्पितवान् ।

जन्मतः मृत्युपर्यन्तं तस्य जीवनस्य प्रत्येकं कार्यम् अस्मिन् काव्ये अतीव वाक्पटुतया छन्दैः सह व्याख्यातम् अस्ति । काव्यस्य भाषा अतीव सरलम् अस्ति। सरलतायै तेन दीर्घसमासश्लोकान् संयोजकश्लोकान् च परिहृत्य संस्कृतानुभवहीनेन अपि अस्य काव्यस्य रसास्वादं लभते । प्रोफेसर जोशिना काव्यस्यास्य सर्गाणां नामकरणं येन कृतं तथा सर्गानुसारं विषयवस्तु अनुमानं सुलभमिति मन्यते। लक्षणानाम् नामकरणमपि अत्यन्तं रोचकमस्ति । प्रत्येकं नामकरणं भीमरवस्य परिचयात्मकम्।

बाल्यकालादेव आम्बेडकर: सवर्णैः अपमानितः इति अनुभवति स्म । बाल्यकाले शिक्षा सर्वथा सुलभा नासीत् । परन्तु युवावस्थायां विद्वान् बाबासाहेबः विदेशेषु विविधशाखासु अध्ययनं कृत्वा ज्ञानं प्राप्तवान् । दलितराष्ट्रस्य उद्धारः तस्य जीवनस्य आदर्शवाक्यमासीत् । अन्धकारात् प्रकाशमार्गं प्रति आनीतुं सवर्णबान्धवेषु ज्ञानप्रकाशं प्रज्वलितवान्। एकदा लण्डन-नगरस्य वर्तुलपीठपरिषदे अन्त्यजवर्णस्य दुर्दशां दृष्ट्वा दिवसरजनीं व्याप्य तेषां उद्धाराय बहुप्रयत्नाः कृत्वा तेषां अधिकारं प्राप्तुं सत्याग्रह-आन्दोलनमारब्धवान् । मुम्बई-नगरस्य एकस्मिन् महाविद्यालये राजनीति-प्रोफेसरः छात्राणां मध्ये लोकप्रियः अस्ति किन्तु तस्य निम्नजातेः कारणात् शिक्षकैः अपि भेदभावः भवति । अस्पृश्यस्य उन्मूलनविषये चिन्तनार्थमिदम् । सः केन्द्रीयमन्त्रिमण्डले

विविधानि पदस्थानानि कुशलतया सम्पादयति स्म । दलितराष्ट्रस्य सामाजिकविकासाय हिन्दुसंहिता निर्मितवान् । ततः बौद्धधर्मे दीक्षां गृहीत्वा स्वर्गं गतः । एषा महापुरुषस्य जीवनवृत्तान्तम् यत्र रामायणस्य प्रसिद्धानां पात्राणां गतिशीलतां न प्राप्यते। तथापि तेन पात्रेण प्रभावितः शारीरिकविकलाङ्गत्वेऽपि कविः भीमरवस्य महानायकत्वेन अपि तु वीरत्वेन सम्मानयन् एतत् महाकाव्यं लिखितवान् ।

संस्कृताध्ययनं प्रतिबन्धं कृत्वा आम्बेडकरं प्रति कृतान्यायस्य प्रतिवादरूपेण कविना काव्यमिदं संस्कृतेन रचितम्। यतः चमत्कारिकगुणैः बाबासाहेबस्य चरित्रं केन्द्रीकृत्य अनेकेषु प्रान्तीयभाषासु पुस्तकानि रचितानि चेदपि तावत्पर्यन्तं संस्कृते काव्यं न लिखितम्। अस्मिन् ग्रन्थकार्ये तस्य परममित्रः संस्कृतप्रेमी श्री मधुसूदन: जोशी तस्य पत्नी श्रीमती अरुणा च नेत्रवत् साहाय्यं कृतवन्तौ।

प्राध्यापक: राधावल्लभ: त्रिपाठी भारतीयसंविधानस्य जनकस्यास्य जीवनीकाव्यस्य विषये उक्तवान् यत् यस्य मृत्योः परं 'भारतरत्नम्' इति नाम्ना - श्रीधर भास्करवर्णेकरस्य 'शिवराज्योदयम्' महाकाव्यस्य अनन्तरं संस्कृतसाहित्ये योजितस्य एतादृशस्य रसपूर्णस्य उत्तमस्य च वर्गस्य प्रथमा प्रान्तीयरचना अस्ति बहुवर्षमनन्तरम्। कविः जोशीः अस्मिन् महाकाव्ये काव्यस्य दशम-एकादश-अध्यायेषु नायकस्य प्रयत्न-वाक्-विचारान् सुन्दरं चित्रितवान् अस्ति ।

काव्यगुणेन सत्याग्रहान्दोलनम्:

२० शतके वयं पश्यामः यत् महाकविनां जीवनसम्बद्धानां पारम्परिककथानां आधारेण बहूनि काव्यानि रचितानि सन्ति । एकविंशतिशतकस्य अधिकांशस्य दृश्य-श्रव्य-काव्यस्य सन्दर्भा सामाजिक-सामाजिक-आर्थिक-राजनैतिक-धार्मिक-शैक्षिक-विषयाः सन्ति । संस्कृतकाव्यं राज्ञीनां जगत् न भवति, संस्कृतकाव्यं प्रायः कठिनवास्तविकताधारितं भवति। स्वातन्त्र्योत्तरभारते काव्य-नाटकेषु विषय-विधि-भाषा-विषये विविधाः प्रयोगाः प्रचलन्ति । अतः २० शताब्द्याः काव्येषु नाटकेषु च पुरातननवयोः समागमः सहजतया अवलोकितः भवति ।

यद्यपि साहित्यदर्पणकारेण विश्वनाथेनोक्तम् - 'नाटकं ख्यातवृत्तं स्यात्' [२]। अत्र 'ख्यात' इति शब्दस्य व्याख्यानकाले सः कथयति - 'ख्यातं रामायणादिप्रसिद्धम्'[३] इत्यादि किन्तु 'आदि' शब्देन अस्माभिः नाटकस्य विषयवस्तु सीमाः च बहु विस्तारिताः। परन्तु २० शताब्द्याः कविनाट्यकारैः विषयचयनं बहु नूतनचिन्तनमिति वयं पश्यामः ।

'भीमायनम्' महाकाव्यस्य द्वितीयसर्गे कविः आङ्ग्लप्रशासनकाले महाराष्ट्रस्य सामाजिकं भौगोलिकं च स्थितिं सुन्दरं वर्णितवान्। ड. अम्बेडकरः च जातौ महार इति आसीत्। भारते तस्मिन् समये स: जातिः अस्पृश्यः इति मन्यते स्म। यदि ते कस्यचित् व्यक्तिं वा वस्तु वा स्पृशन्ति स्म तर्हि ते समाजे अस्पृश्याः इति मन्यन्ते स्म।[४] कोङ्कणप्रान्ते आम्बावडे इति ग्रामे महारजातिः निवसति स्म, रत्नगिरि इति नाम्ना प्रसिद्धः स: मण्डलः 'महाराष्ट्रस्य भूषणम्' इति कथ्यते । परन्तु पुण्यवान्, बुद्धिमान्, दीर्घोद्यगी, अग्रगामी, कुशलः, वीरः, क्षत्रधर्मादिगुणयुत: अपि स: केवलं अन्त्यजत्वात् लाञ्छित: अभवत्-

'महारा अन्त्यजेष्वासन् धार्मिका: बुद्धिमत्तरा:।
दिर्योद्यगी-पुरोगामि-दक्ष-साहसिका अपि।।

क्षात्रधर्मगुणोपेतास्तथापि तु बहिष्कृता:।
लाञ्छिता: अन्त्यजत्वात् ते,"।[५]

प्रायः नायकः सद्गुणी, युवा, बुद्धिमान्, सुन्दरः, ऊर्जावान्, कुशलः, विनयशीलः च भविष्यति । यद्यपि अम्बेडकरः महारजातीयः आसीत् तथापि तस्मिन् सर्वे गुणाः आसन् । आङ्ग्लसाम्राज्यस्य स्थापनायां महारसेनायाः महत् योगदानमस्ति । व्यापाराय आगताः आङ्ग्लाः एकं प्रान्तं जित्वा सुबीरमहारसमुदायेन सह नूतनमेकं सैन्यदलं जितप्रान्तस्य रक्षणार्थं देशस्य जन्मार्थं च कृतवन्तः । ततः अमितमहारजातिः सैनादलस्य सदस्यतां प्राप्तवती, यतः तेषां दीनतानाशस्य एकमात्रं मार्गमासीत् । आङ्ग्लाः स्वहिताय सैनिकान् तेषां परिवारान् च शिक्षयन्ति स्म । यद्यपि दारिद्र्यस्य उन्मूलनस्य आवश्यकता वर्तते तथापि महारेषु ये प्रयत्नाः सम्भावनाः च प्रकटिताः सन्ति इति ज्ञातव्यम् ।

तस्मिन् समये भारते एतादृशे जटिले परिस्थितौ कोऽपि निम्नजातीयः छात्रः विद्यालये अध्ययनं कर्तुम् इच्छति स्म, अतः दुर्व्यवहारस्य कारणेन अत्यल्पकाले एव अध्ययनात् स: पराजित: भवति। अस्पृश्यत्वेन सवर्णेनापि बहुधा अपमानं भवितुमर्हति स्म । यथा - उष्णग्रीष्मकाले अपि तस्य विद्यालयस्य नलिकां जलपानं त्यक्तव्यम् आसीत्, भौतिकविज्ञानविभागं गन्तुं अपि, तेषां स्ववस्त्रक्रयणस्य अधिकारः नासीत्, नार्हजनाः बर्बराः इति कारणेन केशान् न मुण्डयन्ति स्म। एतेषां सर्वेषां कारणात् अपराधं विनापि अस्पृश्यत्वेन नरकं दुःखं भोक्तुं भवति। बाल्येऽपि बालमनसि विषादनिराशाद्विग्रहबीजानि उप्तानि-

सा बालो'पि भीमो'वमानेन तप्तो नितान्तं विषण्णो हताशो वभूव।
तदैवास्य चित्ते तु संघर्षबीजं समरोढुमारब्धमत्यन्ततीव्रम्'।।[६]

भीमयानस्य तृतीयसर्गे (बाल्ये संघर्षवीजारोपणम्) विग्रहबीजानि उप्तानि।

आचार्यभरतस्य मतेन त्रिलोकस्य मनोभावानामनुकरणं नाट्यम्- 'त्रैलोक्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्'[७] इति कथ्यते । पुनः ‘लोकवृत्तानुकरणं नाट्यम्’[८] इति शब्देन भरतः मानवप्रवृत्तीनामनुकरणं नाटकमिति आहूतवान्। प्राध्यापक: राधावल्लभ: त्रिपाठी तस्य 'अभिनवकाव्यालङ्कारसूत्रम्' इति पुस्तके जनानामनुकरणं नाटकम् इति वदति। जना इत्यर्थः यः कोऽपि जनः स्थावरः जङगमात्मक: । अतः राजराणीं विहाय नायकः नितान्तं साधारणः एव, अतः अस्य पात्रस्य पुरातनस्य च चरित्रान्तरं दृश्यते। अत्र बहु पाणिनीविरोधी भाषा प्रयुक्ता अस्ति तथा च साहित्यकाराः तस्मै बहु आदरं दत्तवन्तः। राधावल्लभ: त्रिपाठी 'धीवरशकुन्तलम्' इत्यस्मिन् प्रेङ्खके 'पुलिस' इति शब्दः प्रयुक्तवान्। अपि च संस्कृतकाव्ये वा नाटके वा बास, ट्राम इत्यादयः शब्दाः विभक्तिप्रयोगेन प्रयुक्ताः, अस्मिन् काव्ये'पि 'लुङ्गी' इति शब्दः प्रयुक्तः[९]। दक्षिणभारते पुरुषाणाम् अधोवस्त्रम् इति लुङ्गी प्रसिद्धा अस्ति । संस्कृतमस्ति न अयं शब्द:। दक्षिणभारतीयशब्दो'यं य: पाणिनिघारणात् बहिः। अनेके जनाः संस्कृतभाषां 'पश्चात्कालिकभाषा' इति वदन्ति, परन्तु सम्प्रति पूर्वोक्तकारणात् संस्कृतभाषा म्रियमाणा भाषा इति वक्तुं न शक्यते। आङ्ग्लसाहित्यस्य अन्यप्रान्तीयसाहित्यस्य वा इव संस्कृतभाषासाहित्यस्य महत्त्वं वर्तते इति एतानि सर्वाणि महाकाव्यानि प्रमाणम् ।

'भीमायनम्' इति काव्ये कविः 'तडाग सत्याग्रह' इति दशमसर्गस्य नामाङ्कनं कृतवानस्ति । अत्र तडागशब्दस्य अर्थः मधुरजलबिलम् । महारप्रदेशे चतुर्दश: तडागाः प्रस्रवणा: वा स्वादिष्टजलयुक्ताः सन्ति । डॉ. आम्बेडकरस्य उद्देश्यं यत् तस्य तडागस्य जलं पिबितुं शक्नुवन्ति तथा च तेषां पिबनं किमपि प्रकारेण न निवारितं भवति। अतएव कविना दशमस्य स्वर्गस्य चतुरायेन नामकरणं कृतम् । एतादृशस्य नामकरणार्थं स्वर्गस्य समग्रं पदार्थं सुलभतया अनुमानं कर्तुं शक्यते। दशमसर्गात् तथा सम्पूर्णकाव्यात् अनेकाः श्लोकाः सन्ति येषु सन्धिरहिताः वृत्तिरहिता: च सन्ति । अस्मिन् विषये उदाहरणं श्लोकं वक्तुं शक्यते-

'निसर्गरम्या नररत्नखानिर् मतपूर्वजानां प्रियमातृभूमि:।
प्रेष्ठा'स्ति मे कोङ्कण-भूर् वयं च तदैकभागे मिलिता महाडे।।'[१०]

'रुचिमत्-तडागश्-चतुर्दश:' इत्यादयः समासविषयक:। अत्र कविः सन्धिः श्लोकस्य संक्षिप्तीकरणं करोति, यथा सहजतया अनुमानं कर्तुं शक्यते, यत् सः इच्छया न कृतवान् । पुस्तके कुत्रापि जटिलसमासयुक्तं श्लोकं न पश्यामः। अस्मिन् विषये सः निम्नलिखितं नियममनुसृतवान्-

'संहितैकपदे नित्या नित्या धातूपसर्गयोः।

नित्या समासे वाक्ये तु सा विवक्षाम्पेक्षते।।“

यदा कविः काव्यं लिखति तदा सः अलङ्कारेण सह रसस्य अलङ्कारस्य वा सङ्गतिकरणं चिन्तनं न लिखति, सः स्वस्य सर्वैः लौकिकभावनाभिः सह लिखति। साहित्यदर्पंकार: विश्वनाथ: वदति-

'विभावेनानुभावेन व्यक्त: सञ्चरिणा तथा।
रसतामेति रत्यादि: स्थायी भाव: चेतसाम्।।”[११]

अर्थात् विभाव-अनुभाव-व्यभिचार-द्वारा सहृदयानां कामाः अभिव्यज्यन्ते (परिवर्तन्ते) इत्यर्थः। यथा क्षीरं दधिं भवति तथा सुहृदयानां विभावादिज्ञानं रसेन परिणमते । रसबोधस्य दृष्ट्या इदं महाकाव्यं नवरसेन पूर्णम्। नाट्यकारभरतस्य मतेन नाटके सर्वविधाः रसाः भवितुम् अर्हन्ति, परन्तु एकैव अङ्गी प्रधानः वा स्यात् । स च अङ्गिरसः शृङ्गारः वीरः वा भवितुमर्हति। आत्मकथात्मकत्वेऽपि एतत् काव्यं पाठकस्य मनसि वीरकाव्यमिति मन्यते । प्राध्यापकः रहसविहारी द्विवेदी कथयति यत् अस्मिन् काव्ये विरोधः प्रधानः रसः। सः विरोधरसस्य लक्षणं सन्दर्भ्ये अवदत्-

'स्थायिभावो'स्य संवेग: स च संवेदनात्मक:।
आलम्बनं च सन्तापो दलितानां च पीडनम्।।

उद्दीपनं परौद्धत्यं दिनानां शोषणं छलम्।
अनुभावो'स्य संघर्षचेष्टाक्लेशससमुद्भवा।।

व्यभिचारिण एतस्यामर्षवेगदयादय:।
सुखिन: सन्तु सर्वे'पीति प्रख्योभस्य भावना।।“[१२]

बिक्षोभस्य स्थायिभाव: संवेग:। अतः अत्र संवेगः विरोधरूपेण परिणमते। आलम्बना उद्दीपना च भेदेन विभाव: द्विविध:। सन्ताप अर्थात् दलितानां उत्पीडनमत्र आलम्बना विभाव:। सवर्णस्य अभिमानी व्यवहारः दलितानां शोषणं च अत्र उद्दीपना विभाव:। विग्रहप्रयत्नक्लेशात् उत्पन्नाः

भावाः अनुभावा:। स्वावस्थानात् दलितजातिं तेषां दुःखात् वा बहिः आनयितुं अम्बेडकरस्य प्रयत्नाः अस्मिन् काव्ये भावस्य आकारं गृहीतवन्तः। दशमसर्ग डॉ. अम्बेडकरस्य मधुरजलपानार्थं सत्याग्रहान्दोलनस्य वर्णनं भीमरबस्य अध्यक्षीयभाषणे दलितानां, समाजस्य शोषितजातीनां सामाजिकाधिकारं पुनः स्थापयितुं, तेषां समानाधिकारः च स्पष्टतया उक्तः अस्ति।

महारेषु सवर्णमित्राणां तिरस्कारः, शाश्वतदासत्वं, भारते तत्कालीने तेषां प्रति जटिला स्थितिः, या अस्मिन् पत्रे संक्षेपेण वर्णिता, कविना दर्शिता सहानुभूतिः सत्याग्रह-आन्दोलनस्य आह्वानं कृतवती अस्ति , नायकमनसि विरोधः सञ्जात:। डॉ. अम्बेडकरः महाराष्ट्रस्य कोङ्कनप्रान्ते स्वपितृणां प्रियमातृभूमिं, यस्य सुन्दरं दृश्यं प्रथमं कविना वर्णितम् तत्र सर्वान् भगिन्यान् दलितजातिं प्रति स्वाधिकारं प्रतिदातुं सङ्गृहीतवान्। सः तान् अङ्गुलीभिः दर्शितवान् यत् कथं महारा:जना: सैनिकाः भूत्वा स्वं सुशिक्षिताः धनिनः आङ्ग्लशासनकाले स्थापिताः च कृतवान्। । तेषां साहाय्येन आङ्ग्लसेना स्वसाम्राज्यं स्थापयितुं समर्था अभवत् । अतः एतेषां दलितानां राजपदं प्राप्तुं अवश्यरूपेण कारणमस्ति।

सवर्णेन अस्पृष्टत्वात् एव ते महारा: छिन्न-भिन्ना। अतः ज्ञानप्रकाशेन अज्ञानस्य तीव्रं तमः निवारयितुं शक्यते। शिक्षिताः सन्तः दलिताः अपि योग्यतायाः आधारेण दुर्लभाः प्रशंसनीयाः पदानि प्राप्तुं शक्नुवन्ति । अतः दलितैः शिक्षाद्वारा अज्ञानस्य पर्दा अपसारणीयम्। तेन मनः बलवान् भविष्यति, आत्मनः प्रबोधः भविष्यति। त्वं स्वयमेव ज्ञास्यसि। शासकशक्तेः दुष्टप्रभावात् महारवर्गः स्वाधिकारं विस्मृतवानस्ति । अतः उच्चवर्गः यत्किमपि विघ्नं सृजति तत् दूरीकरणमिदानीं अत्यावश्यकम्। यतो हि गीतायां उक्तं यत् आत्मोन्नते: एकमात्रं साधनं स्वस्योद्धरणमेव। अतः बाबासाहेबस्य स्वामित्वस्य अधिकारं हर्तुं च एषः प्रयासः (प्रधानभाषणम्) सर्वं रसोत्पत्तिषु भावः एव अनुभाव इति परिभाषितुं शक्यते। काव्यस्य तृतीयसर्गादारभ्य नवमसर्गपर्यन्तम् अन्यायपूर्णमुत्पीडनं यावत् नायकस्य शिशुमनः यथा सहस्रं बाधकमतिक्रम्य सम्मानार्थं निराशः भवति तथा च विदेशे ज्ञानं प्राप्य भारतं प्रत्यागत्य विभिन्नेषु आदरणीयक्षेत्रेषु प्रतिष्ठाप्य, यदा सः अपश्यद् यद् दलितजनाय चिन्तायाः किमपि परिवर्तनं नासीत्, सामाजिकेषु धार्मिकेषु वा परिस्थितौ परिवर्तनं नासीत्, यद्यपि सः उत्तमः शिक्षकः इति कारणेन छात्रसमाजस्य विशेषलोकप्रियतां प्राप्तवान् तथापि सः सहकारिभिः भेदभावं कृतवान् तथा च नानाक्षेत्रेषु आन्दोलनं कृत्वा स्वस्य अधिकारं हृतवान्। तस्य उदाहरणं गणेशमन्दिरगमनम्।[१३] आदौ अस्मिन् काव्ये दर्शितस्य क्लेशस्य भावो'नुभाव इति मन्यते।

नायकस्य क्रोधः, वेगः, दयालुता च काव्ये भविष्यति। एतान् गुणान् विना सः कथञ्चित् काव्ये नाटके वा नायकः भवितुं न शक्नोति । 'क्रोधो'मर्ष:' इति । सम्पूर्णे काव्ये नायकस्य क्रोधस्य वेगस्य च सुन्दरं चित्रणं कविना कृतमस्ति । आचार्यविश्वनाथः, दशरूपककार: धनञ्जय: वा अन्ये प्रख्याताः आलङ्कारिका: नायकस्य केचन सामान्यलक्षणाः परिभाषयित्वा चतुर्धा विभज्य प्रत्येकस्य विशेषलक्षणं निर्धारितवन्तः। आचार्य विश्वनाथस्य मतेन नायक: भवेत्-

'त्यागी कृती कुलीन: सुश्रीको रूपयौवनोत्साही।
दक्षो'नुरक्तलोकस्तेजो वैदग्ध्यशीलवान् नेता।।'[१४]

अपि च धनञ्जयः किञ्चिदधिकं लक्षणं योजितवान् यत् नायकः विनयशीलः, मधुरः, प्रियः, शूरः, बलवान् इत्यादयः भविष्यति।[१५] न केवलं दृश्ये अपितु महाकाव्ये नायकस्य गुणाः लक्षणानि च सार्वत्रिकानि सन्ति ।

परन्तु अलङ्कारशास्त्रे चतुर्विधनायकानां लक्षणानि न्यायं कृत्वा यदि अस्य काव्यस्य नायकस्य स्वभावः कस्यापि प्रकारस्य नायकस्य लक्षणैः सह सङ्गतः भवति तर्हि प्राचीनानां नायक-नायिकायाः सङ्गतिं न करोति इति अवश्यं वक्तव्यम्। सर्वं यतो हि 'धीरोदात्त:' वर्गस्य नायकः भविष्यति-

'महासत्तवो'तिगम्भीर: क्षमावान्विकत्थन:।
स्थिरो निगूढाहङ्कारो धीरोदात्तो दृढव्रत:।।[१६]

श्लोके यथा प्रत्येकं लक्षणं महाकाव्यस्यास्य नायके अस्ति, तदतिरिक्तमन्ये केचन गुणाः अपि सन्ति अत: अम्बेडकरः धीरोदत्तवर्गस्य नायकः इति परिचयः कर्तुं शक्यते ।

अलंकारसज्जायामपि कवेर्कुशलता सुस्पष्टम्। पञ्चदशे सर्गे-

'गृहिणी गृहमुच्यते' इति वचनं सत्यमिदं हि सत्कवे:।
सति राजगृहे त्वया विना त्वशरण्यो'भवमद्य साश्रय:।।

नलिनीरहितं सरो यथा शशि-लेखा-बिकलं नभस्तलम्।
मम गेहमिदं त्वया विना सुषमा-शूण्यवनं हि भासते।।'"[१७]

श्लोको'यं अर्थान्तरन्यासालङ्कार: मतः । अत्र अर्थान्तरन्यासस्य लक्षणानुसारेण विशेषपदार्थेन सामान्यं समर्थित:। पत्नीहीनः नायकः प्रासादे अपि असहायः अनुभवति, यथा नलिनीविरहित:

सरोवर: शशिविना नभोतलं शून्यं भवति, तथैव नायकः अपि स्त्रीविना शून्यः मन्यते।पुनः अन्तिमवाक्यद्वयं यदि न्याय्यं चेत् तर्जहिं अत्र सामान्येन विशेषसमर्थनम् इति द्रष्टव्यम् ।

'महारा अमिता: सैन्ये प्रविष्टा दूर-दूरत:'[१८] पुनः 'प्राप्तः देशस्य रक्षार्थं जेतुं देशं नवं नवम्।'[१९] श्लोकद्वये केचिद्वदन्ति वैचित्राभावाद् नालङ्कार: केचित् पुनः अनेकव्याञ्जनस्य सकृत् स्वरूपत: क्रमतश्च साम्यात् छेकानुप्रास इति। काव्ये 'बालाबला' इति पदे व्यञ्जनस्य स्वरूपत: क्रमतश्च सादृश्यमस्ति। 'पृथक् पृथक्' इत्यत्र वैचित्राभावान्नालंकार:। 'विधो विधेया' इत्यत्र स्वरस्य वैसादृश्ये'पि व्यञ्जनस्य सकृत् साम्यं दृष्टम्। 'धर्मशाला-शाला-प्रशाला' इत्यत्र अनेकस्य व्यञ्जनस्य स्वरूपत क्रमतश्च साम्यात् वृत्यनुप्रास:। 'भूता धृता शरीरेण मृता' अत्र एकस्य व्यञ्जनस्य असकृत् उच्चारणात् वृत्यनुप्रास:।

उपसंहार:

उदात्तं प्रयोजनं स्थापयितुं लेखकेन काव्यस्य भाषां कठिनेन न आच्छादिता अपितु औपचारिकताविहीनतया सरलतया प्रवाहितया च भाषायां प्रस्तुतं यत् सर्वे वरेन्यस्य बाबासाहेबस्य जीवनवृत्तान्तं पठितुं शक्नुवन्ति तस्य आनन्दं च लभन्ते तस्माद् दुरूहवृत्तिसन्धिवर्जितभाषया काव्यमिदं कविना लिखितम्-

'द्विजो'पि विद्यारहितस्तदानीम् आसीन्मत: श्रेष्ठतम: समाजे।
धीमान् सुविद्यो'पि वराक-शूद्र आसीन्मत: क्षुद्रतमस्तदानीम्।।'[२०]

अन्ते संस्कृतभाषा बहूनां भारतीयभाषाणां जननी इति कारणतः सर्वाभिव्यञ्जनानां अभिव्यक्तये समर्था इति वक्तुं शक्यते, अतः पौराणिक-ऐतिहासिक-जीवनी-काव्यैः सह आधुनिकसंस्कृतसाहित्यस्य स्थानं वर्तते। अस्याः भाषायाः सर्वान् भावानाम् अथवा आधुनिकव्यञ्जनानां अभिव्यक्तिं कर्तुं सा निहितशक्तिः अस्ति ।

पादटिप्पणी

१. भीमायनम्, चतुर्थ:सर्ग:।
२. साहित्यदर्पण:, षष्ठ: परिच्छेद:।
३. साहित्यदर्पण: षष्ठ: परिच्छेद:।
४. भीमायनम्, द्वि. स. श्लोक:- १-२।
५. भीमायनम्, द्वि.स., श्लोक:- ३-४।
६. भीमायनम्, तृ.सं., श्लोक ४७।

७. नाट्यशास्त्रम्, १:१०३।

८. नाट्यशास्त्रम्, १:१०९।

९. भीमायनम्, न. स. श्लोक: ३३।

१०. भीमायनम्, द.. स. श्लोकः २१।

११. साहित्यदर्पण:, तृतीय: परिच्छेद:।

१२. आधुनिकसंस्कृतसाहित्यसंग्रहः, पृ. ३४।

१३. भीमायनम्, सप्तम: सर्ग:।

१४. साहित्यदर्पण:, तृतीय: परिच्छेद:।

१५. दशरूपक:, द्वितीय: प्रकाश:।

१६. दशरूपक, द्वितीय प्रकाश:।

१७. भीमायनम्, पञ्चदश: स., श्लोक:- ३८-३९।

१८. भीमायनम्,द्वि. स. श्लोक:- ७।

१९. भीमायनम्,द्वि. स. श्लोक:- ६।

२०. भीमायनम्,प्र. स. श्लोक:- १८।

ग्रन्थसूची

1. 'आधुनिक संस्कृत साहित्य', लेखक :डॉ. रीता चट्टोपाध्याय:, कलकाता; प्रोग्रेसिव पावलिशार्स, प्रथम: प्रकाशित: २०१२, पुनर्मुद्रणम्।

2. 'दशरूपक:', सम्पादक: डॉ. सीतानाथ आचार्य: डॉ. देवकुमार दास: च। कलकाता ; संस्कृत: पुस्तक: भाण्डार:, चतुर्थ: संस्करण: २०१६।

3. 'भीमायनम्'। लेखक:, प्रो.प्रभाकर शंकर जोशी, पुणे; शारदा-गौरव-ग्रन्थ-माला, मुद्रितम्।

4. 'भीमाम्बेडकरशतकम्'। सम्पादक:, डॉ प्रिय-सेन-सिंह:, दिल्ली; राष्ट्रीय संस्कृत संस्थानम्। संस्करण: २०१२।

5. 'साहित्यदर्पणः'। सम्पादक:, बिमलाकान्त: मुखोपाध्याय:। कलकाता; संस्कृत: पुस्तक: भाण्डार:, नूतन: संस्करण:, २००८।

6. 'साहित्यदर्पण:', सम्पादक:, डॉ उदयचन्द्र: वन्द्योपाध्याय: डॉ. अनिता वन्द्योपाध्याय: च, कलकाता; संस्कृत-वुक्-डिपो, प्रथम: संस्करण: १४०७ वङ्गाब्द:, पुनर्मुद्रणं २०११।

7. 'नाट्यशास्त्रम्', सम्पादक:, डॉ सुरेशचन्द्र वन्द्योपाध्याय:, कलकाता, नवपत्र प्रकाशन, षष्ठ: संस्करण:, २०१४।

8. https://youtu.be/JwhiQPf3jt4?si=RnfvOtAqQCJ1oB_k

कालिदासररूपकेषु सामुद्रिकशास्त्रसन्दर्भाः

प्रज्ञा करकरे
शोधच्छात्रा, संस्कृतभाषा- साहित्यविभागः,
कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः, रामटेकम्

प्रो. पराग जोशी
मार्गदर्शकः, संस्कृतभाषा-साहित्यविभागः,
कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः, रामटेकम्

सारांशः

त्रिस्कन्धात्मकस्य ज्योतिषशास्त्रस्य महत्त्वपूर्णम् अङ्गं वर्तते संहितास्कन्धः । अस्य स्कन्धस्यान्तर्गते सामुद्रिकशास्त्रं विद्यते । प्राचीनकाले मानवानाम् अङ्गलक्षणानुसरेण फलकथनस्य प्रचलनम् आसीत् । पूर्वकाले एषा अङ्गविद्या इति नाम्ना प्रसिद्धा किन्तु तदनन्तरं एषा विद्या सामुद्रिकशास्त्रमिति नाम्ना प्रचारितं प्रसारितञ्च । कविः स्वनाटके काव्ये वा अनेन प्रयोगेण पात्रस्य भविष्यं स्वभावञ्च निरूपयति । शोधपत्रेऽस्मिन् कालिदासरचितानि अभिज्ञानशाकुन्तलं विक्रमोर्वशीयं मालविकाग्निमित्रं नाटकत्रयाण्यपि स्वीकृतानि । त्रिषु नाटकेषु अपि प्राप्तानि अङ्गलक्षणानि सामुद्रिकशास्त्रलक्षणैः सह तुलनात्मकमध्ययनमत्र विधीयते ।

मुख्यशब्दाः– सामुद्रिकशास्त्रम् ,कालिदासः ,अङ्गलक्षणानि ,अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रम् ।

प्रस्तावना

वेदपुरुषस्य निर्मलचक्षुरूपं ज्योतिषशास्त्रमिति कथ्यते । अस्य शास्त्रस्य त्रिस्कन्धाः भवति - सिद्ध◌ान्तगज्योतिषशास्त्रे जगतः शुभाशुभफलानि निरूपितानि सहोरेति । अस्मिन् वेदाङ्-संहिता-न्ति ।

सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम् ।
वेदस्य निर्मलं चक्षुर्ज्योतिःशास्त्रमनुत्तमम् ॥

अस्य शास्त्रस्य सम्बन्धो वेदाङ्गमिति कथ्यते ।
अभिधेयञ्च जगतः शुभाशुभनिरूपणम् ॥[1]

[1] नारदसंहिता प्रथमोऽध्यायः ४५-

अतः स्कन्धत्रयात्मकमिदं ज्योतिषशास्त्रम्। अत्र स्कन्धार्थः इति स्वीक्रियते। सर्वेषां ”शाखा“ ”संहिता“ ज्योतिषशास्त्रविषयाणां विवरणं यत्र प्रदीयते तत् इति उच्यते।

अङ्कबीजगणितमाध्यमेन ग्रहाणां गतिः, मार्गवक्रादि ज्ञानं सिद्धान्तस्कन्धे निरूपितमस्ति । तृतीये होरास्कन्धे जातकस्य ग्रहस्थितिर्दशानुसारं फलकथनं विधीयते । यथा आचार्यवराहमिहिरेण बृहत्संहिताग्रन्थे उक्तम् -

ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम्।
तत्कात्स्न्र्योपनयनस्य नाम मुनिभिः सङ्कीर्त्यते संहिता ।।

स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ।
होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः ।।[2]

अतत्रिस्कन्धैः सन्निहिते ज्योतिषशास्त्रेऽस्मिन् अनेकविधाः विषयाः प्रतिपादिताः सन्ति । तत्र : ग्रहगोचरं - संहितास्कन्धस्य वर्ण्यविषयाः सन्ति, ग्रहचारः संवत्सरफलानि, तिथयः, नक्षत्राणि मुहूर्तादयः। अन्यच्च सामाजिकविज्ञानं, भौगोलिकशास्त्रं, वास्तुशास्त्रं, सामुद्रिकशास्त्रं, वृष्टिविज्ञानं, भूजलस्य ज्ञानं कृषिविज्ञानं, खगोलशास्त्रं:वृक्षायुर्वेद ,, आपदः तेषां पूर्वानुमानोपायाश्च, स्वरशकुनशास्त्रञ्चेति। इत्थं हि - मनुष्याणां कृते मङ्गलपथदर्शक अस्ति अयं संहितास्कन्धः। अस्य स्कन्धस्यैव महत्त्वपूर्णम् अङ्गं वर्तते : ”सामुद्रिकशास्त्रम्“ इति । अस्य शास्त्रस्याधारेण नृस्त्रीणाम् अङ्गलक्षणानि दृष्ट्वा तेषां शुभाशुभफलकथनं कर्तुं शक्यते।

प्राचीनकालतः एव इदं सामुद्रिकशास्त्रं भारते प्रसिद्धम् । अस्य शास्त्रप्रर्वतकाः वेदव्यासः, कश्यपः:भारद्वाज ,गर्गाचार्यः ,, गौतमादयाः सन्ति । रामायणे, महाभारते अष्टादशपुराणेषु वा सामुद्रिकशास्त्रसन्दर्भाः विद्यन्ते । तर्हि विस्तृतं व्यापकञ्च भवति इदं शास्त्रम्। अस्य सामुद्रिकशास्त्रस्योद्गमविषये यन्मतं विद्वांसः स्वीकुर्वन्ति तदस्ति भगवान् विष्णुः भगवत्याः लक्ष्म्याः अङ्गसौष्ठवं, सौन्दर्यञ्च दृष्ट्वा समुद्रऋषिरूपेण अवतीर्य यद् शास्त्रं रचितं तदस्ति सामुद्रिकशास्त्रम् । सामुद्रिकशास्त्रे उक्तम् -

इत्थं विचिन्त्य सुवरे स्वहृदि समुद्रेण सम्यगवगम्य।
नृस्त्रीलक्षणशास्त्रं रचयाञ्चक्रे तदादि तथा ।।[3]

अस्य शास्त्रस्य माध्यमेन स्त्रीनृणां दृश्यादृश्याङ्गप्रत्यङ्गास्य शुभाशुभलक्षणाधारेण तेषां भविष्यं, स्वभावं, व्यवहारंव्यक्तित्वञ्च फलकथनं कर्तुं शक्यते। ,
फलकथनार्थं कस्याधारेण क्रियते तत् आचार्यवराहमिहिरेण बृहत्संहितायां कथितम्।

उन्मानमानगतिसंहतिसारवर्ण-
स्नेहस्वरप्रकृतिसत्त्वमनुकमादौ।

---

[2] बृहत्संहिता उपनयनाध्याय९ :

[3] सामुद्रिकशास्त्रम् प्रथमोऽधिकारः ८

क्षेत्रं विधिवत्कुशलोऽवलोक्य-
सामुद्रविद्वदति यातमनागतं वा ।।[4]

उन्मानं, मानं, गतिः,संहतिः सारःवर्ण :, स्निग्धताःशब्द ,, प्रकृतिः (स्वभावः(, सत्त्वं, अनूकं, क्षेत्रं, मृजाञ्चेत्यादीनामाधारेण नृस्त्रीणां फलकथनं कर्तुमत्र निर्देशितमस्ति ।

एवं प्रकारेण ज्योतिषशास्त्रे फलकथनार्थं नैकाः विधयः दृश्यन्ते तत्र एका विधिः विद्यते सामुद्रिकशास्त्रम् । एतस्य सहाय्येन अङ्गलक्षणं दृष्ट्वा भविष्यं, व्यक्तित्त्वं, चारित्र्यं कथं भवतीति परिकल्पते । संस्कृतसाहित्ये अवलोक्य एतत् ज्ञातुं शक्यते खलु कविः स्वकाव्ये पात्रस्य नायकनायिकयोः वा कृते अस्य शास्त्रस्य प्रयोगं करोति । येन पात्रस्य स्वभावः व्यवहारञ्च ज्ञायेते । तथापि सामुद्रिकशास्त्रस्य सन्दर्भाः काव्ये, नाटके वा तत्र तत्र बहुलतया प्राप्यन्ते ।

यथा अभिज्ञानशाकुन्तले राजा दुष्यन्तः शकुन्तलायाः शरीराकृतिं दृष्ट्वा तस्याः प्रशंसां करोति ।

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्मलक्ष्मीं तनोति ।

इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।।[5]

इदानीं कालिदासरचितेषु अभिज्ञानशाकुन्तलम्विक्रमोर्वशीयम् ,, मालविकाग्निमित्रम् इति नाटकत्रयेषु प्राप्ताः सामुद्रिकशास्त्रसन्दर्भाः अधोलिखिताः सन्ति ।

नेत्रलक्षणम् –

सामुद्रिकशास्त्रानुसारं यस्याः स्त्रियाः नेत्रे मृगसदृशे स्तः यस्याः कण्ठोदरः ,ऊरुः च मृगवत् भवतः, सा कुमारी दरिद्रकुटुम्बे जातापि नृपपत्नी भवति ।

या हरिणाक्षी हरिणग्रीवा हरिणोदरी हरिणजङ्घा ।

जातापि दासवंशे सा युवतिर्भवति नृपपत्नी ।।[6]

यथा अभिज्ञानशाकुन्तलस्य नायिका शकुन्तला तथा च मालविकाग्निमित्रस्य नायिका मालविका मृगनयने नायिके स्तः ।
अभिज्ञानशाकुन्तले-

न नमयितुमधिज्यमस्मि शक्तो धनुरिदमाहितसायकं मृगेषु ।

सहवसलिमुपेत्य यैः प्रियायाकृत इव मुग्धविलोकितोपदेशः ।। :[7]

[4] बृहत्संहिता ,पुरुषलक्षणम्१ अष्टषष्टितमोऽध्यायः ,

[5] अभिज्ञानशाकुन्तलम् १२०/

[6] सामुद्रिकशास्त्रम्४७ ,पञ्चमोऽधिकारः ,

अस्मिन् उदाहरणे राजा वदति यत् एतेषां मृगाणां नेत्राणि मम प्रियशकुन्तलायाः नेत्रयोः सादृश्यकारणात् अहं बाणैः प्रहारं कर्तुं न शक्नोमि।

शकुन्तलायाः चक्षुषोः कृते मृगनेत्राणाम् उपमा अत्र दीयते। अवश्यं शकुन्तला मृगनयनी अस्ति। यदि स्त्री मृगनयनी स्यात् सा राजपत्नी भवेदिति सामुद्रिकशास्त्रकारमतम्। शकुन्तला जन्मादेव आश्रमे पालिता। पश्चात् च राज्ञा दुष्यन्तेन सह गान्धर्वविवाहं कृत्वा राजपत्नीमभवत्।

अनन्तरं विक्रमोर्वशीये -

मया ज्ञातं मृगलोचनां निशाचरः कोऽपि हरति।
यावन्नु नवतडिच्छयामलो धाराधरो घर्षति॥[8]

प्रस्तुतश्लोके राजा पुरुवा आकाशे विद्युल्लतां दृष्ट्वा मृगनयनी उर्वशी वा इति भासते। उर्वशी इन्द्रलोकस्य अप्सरा अस्ति। सा तु मर्त्यलोकराजपत्नीमभवत्।

किन्तु एतद् विहाय मालविकाग्निमित्रं नाटके कालिदासमालविकां पद्मायताक्षी इति वर्णयति। : एकवर्षपर्यन्तं सा दासी भवति किन्तु राज्ञा अग्निमित्रेण सह विवाहोपरान्त सा सुखं भुङ्क्ते।

यथा

स्मयमानमायताक्ष्याः किञ्चिदभिव्यक्तदशनशोभि मुखम्।
असमग्रलक्ष्यकेसरमुच्छवसदिव पङ्कजं दृष्टम्॥[9]

सामुद्रिकशास्त्रानुसारं कमललोचनी स्त्री सुखेन जीवनव्यापनं करोति।
यथा सामुद्रिकशास्त्रे -

नीलोत्पलदलतुल्यैरतिविमलैः सूक्ष्मपक्ष्मभिः स्निग्धै। :
नयनैरिवार्क कमलैर्भवन्ति सौभाग्यभोगिन्यः॥[10]

पक्ष्मलक्षणम् -

यस्याः स्त्रियाः स्थूलस्निग्धपक्ष्माणि शोभन्ते सा सौभाग्यवती भवति।-घन-

सुदृढैः स्निग्धैः कृष्णैः सूक्ष्मैः स्यात्पक्ष्मभिर्घनैः सुभगा।
सूक्ष्मैर्विरलैः कपिलैः स्थूलैर्निन्धा ध्रुवमजाभैः॥[11]

यथा अभिज्ञानशाकुन्तलस्य तथा मालविकाग्निमित्रस्य वा नायिकायाघनपक्ष्माणि सन्ति। :

---

[7] अभिज्ञानशाकुन्तलम् २३/

[8] विक्रमोर्वशीयम् ४८/

[9] मालविकाग्निमित्रम् २१०/

[10] सामुद्रिकशास्त्रम् चतुर्थोऽधिकारः १६४

[11] सामुद्रिकशास्त्रम् चतुर्थोऽधिकारः १७२

मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम् |
मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु ॥[12]
हस्तं कम्पयते रुणद्धि रशनाव्यापारलोलाङ्गुली
स्वौ हस्तौ नयति स्तनावरणतामालिङ्ग्यमाना बलात् ।

पातुं पक्ष्मलनेत्रमुन्नमयतः साचीकरोत्याननं
व्याजेनाप्यभिलाषपूरणसुखं निर्वर्तयत्येव मे ॥[13]

अधरलक्षणम् -

यस्याः स्त्रियाः बन्धुजीवपुष्पबिम्बफलादिसदृशः रक्तवर्णः अधरः तथा च कुन्दपुष्पादीनि इव दन्ताः सन्ति, सा धनं सुखं च प्राप्नुयात् ।

बन्धुजीवकुसुमोपमोऽधरो मांसलो रुचिरबिम्बरूपभृत् ।

कुन्दकुड्मलनिभाः समा द्विजा योषिता पतिसुखामितार्थदाः ॥[14]

यथा अभिज्ञानशाकुन्तले तथा मालविकाग्निमित्रे शकुन्तलाया :मालविकायाः च अधरः रक्तवर्ण : बिम्बोष्ठः इति कालिदासः वर्णयति । द्वयोः अपि नायकयोअग्निमित्रदुष्यन्तयोः मालविकाशकुन्त :ले प्रति प्रबलः शुद्धः च प्रेम वर्तेते ।

इत्थं हि मालविका शकुन्तला च पतिसुखं प्राप्नुतः।
यथा अभिज्ञानशाकुन्तले -

अधरकिसलयरागः कोमलविटपानुकारिणौ बाहू । :
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥[15]

मालविकाग्निमित्रे -

दाक्षिण्यं नाम बिम्बोष्ठी नायकानां कुलव्रतम् ।
तन्मे दीर्घाक्षि ये प्राणास्ते त्वदाशानिबन्धनाः ॥[16]

ऊरुलक्षणम् -

अङ्गलक्षणशास्त्रानुसारं यस्याः स्त्रियाः ऊरुः कदली इव यद्यस्ति सा राजपत्नी भवति ।

मदनगृहस्तम्भौ यौ कदलीकाण्डद्वयोपमावूरु ।
यस्याः करिकरवृत्तावरोमशौ भूपत्नी स्यात् ॥ [17]

---

[12] अभिज्ञानशाकुन्तलम् 3/22
[13] मालविकाग्निमित्रम् ४१५/
[14] बृहत्संहिता, कन्यालक्षणाध्याय६ :
[15] अभिज्ञानशाकुन्तलम् १२१/
[16] मालविकाग्निमित्रम् ४१४/
[17] सामुद्रिकशास्त्रम् चतुर्थोऽधिकारः ३८

यथा अभिज्ञानशाकुन्तले –

किं शीतलैः क्लमविनोदिभिरार्द्रवातान्
सञ्चारयामि नलिनीदलतालवृन्तैः ।

अङ्के निधाय करभोरु यथासुखं ते

संवाहयामि चरणावुत पद्मताम्रौ ।।[18]

अत्र शकुन्तलायाः ऊरुः करभसदृशः इव इति वर्णितम् अस्ति। अस्य लक्षणस्य कारणात् सा राज्ञः पत्नी अभवत्।

अन्यच्च विक्रमोर्वशीये –

अपराधी नामाहं प्रसीद रम्भोरु विरम संरम्भात्।
सेव्यो जनश्च कुपितः कथं नु दासो निरपराधः ।।[19]

अत्र उर्वश्याः कदलीसदृशः ऊरोः वर्णनं दृश्यते। उर्वशी इन्द्रलोकस्य अप्सरा किन्तु सा पुरुरवा राज्ञः पत्नी अभवत्।

स्त्रियाः चतुर्भेदाः विद्यन्ते । पद्मिनी, हस्तिनीशङ्खिनी ,, चित्रिणी इति । तदनुसारं कालिदासनाटकत्रयाणामपि नायिका – प्रकारस्य वर्तते। यथा उक्तमत्र यत् ''पद्मिनी''

स्निग्ध श्यामलकान्त्रिस्तिलकुसुमाकारसुभगनासा च।
त्रिवली तरङ्गमध्या वृत्तकुचा स्निग्धकृष्णकचा।।

पद्ममुखी मधुगन्धा पद्मायतलोचना प्रियालापा।
बिम्बोष्ठी हंसगतिर्धर्मरतिः पद्मिनी भवति ।।[20]

या स्त्री स्निग्धा, श्यामलकान्तिः तिलपुष्पाकारनासिकाउदरे त्रिवली ,, वृत्ताकाराः स्तनाः ,स्निग्धकेशाः , कमलमुखी, कमललोचनीरक्तवर्णः अधरः ,, हंसगतिः स्यात् सा पद्मिनी इति कथ्यते । यथा मालविकाग्निमित्रे –

दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः
सङ्क्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव।

मध्यः पाणिमितो नितम्बि जघनं पादावरालाङ्गुली
छन्दो नर्तयितुर्यथैव मनसि श्लिष्टं तथास्या वपुः ।।[21]

---

[18] अभिज्ञानशाकुन्तलम् ३१८/

[19] विक्रमोर्वशीयम् २२०/

[20] सामुद्रिकशास्त्रम् पञ्चमोऽधिकारः ५९, ६०

[21] मालविकाग्निमित्रम् २३/

अपराधिनि मयि दण्डं संहरसि किमुद्यतं कुटिलकेशि ।
वर्धयसि विलसितं त्वं दासजनायाद्य कुप्यसि च ।। [22]

पद्मायतलोचनीकुटिलकेशी लावण्यवती मालविका अस्य ,बिम्बोष्ठी ,स्थूलनितम्बिनी ,उन्नतस्तनी , नाटकस्य पद्मिनीरूपा भवति।

अन्यच्च विक्रमोर्वशीये –

असुलभा सकलेन्दुमुखी च सा किमपि चेदमनङ्गविचेष्टितम् ।
अभिमुखीष्विव काङ्क्षितसिद्धिषु व्रजति निर्वृतिमेकपदे मनः ।।[23]

सुरसुन्दरी जघनभरालसा पीनोत्तुङ्गघनस्तनी
स्थिरयौवना तनुशरीरा हंसगतिः ।

गगनोज्ज्वलकानने मृगलोचना भ्रमन्ती
दृष्टा त्वया तद्विरहसमुद्रान्तरादुत्तारय माम् ।।[24]

अस्य नाटकस्य नायिका अप्सरा उर्वशी अस्ति । तस्याः सौन्दर्यम् अनौपम्यं वर्तते । इन्दुमुखी ,घनस्तनी , तन्वी ,स्थूलनितम्बिनी, क्षीणकटि हंसगतिर्युक्ता उर्वशी पद्मिनीस्त्री भवति ,।

इत्थं हि शाकुन्तले अपि शकुन्तलायाः कृते एतादृशानि एव अङ्गलक्षाणानि इतरत्र वर्णितानि । अतः सा अपि पद्मिनीस्त्री भवति इति वक्तुं शक्यते ।

सामुद्रिकशास्त्रानुसारं स्वभावः ज्ञातुं शक्यते । शास्त्रेऽस्मिन् देवादिभेदानुसारं द्वादशप्रकृतयः चर्चिताः। तत्र एका प्रकृतिः विद्यते गन्धर्वस्वभावा स्त्री इति । मालविका गन्धर्वस्वभावा नायिका दृश्यते । अस्याः प्रकृतेः लक्षणं यथा –

उद्यानवनासक्ता कलस्वरा गीतनृत्यरक्तमनाः ।
परिचितसुगन्धमाल्या गन्धर्वप्रकृतिरबला सा ।।[25]

एतद् लक्षणानुसारं नाटके अपि दृश्यते यत् मालविकायाः नृत्याचार्यः गणदासः तस्याः नृत्यस्य कौतुकं करोति । मालविकायाः नृत्ये वैलक्षण्यं दृष्ट्वा आचार्यः स्वात्मानं धन्यं मन्यते । द्वितीये अङ्के सा एकं पद्यमपि गायति ।

यद्यत्प्रयोगविषये भाविकमुपदिश्यते मया तस्यै ।
तत्तद्विशेषकरणात्प्रत्युपदिशतीव मे बाला ।।[26]

---

22 मालविकाग्निमित्रम् ३२२/

23 विक्रमोर्वशीयम् २९/

24 विक्रमोर्वशीयम् ४५९/

25 सामुद्रिकशास्त्रम् पञ्चमोऽधिकारः ३५

26 मालविकाग्निमित्रम् १५/

मालविकायाः गीतम् –

दुर्लभः प्रियो मे तस्मिन्भव हृदय निराश-
महो अपाङ्गो मे परिस्फुरति किमपि वामः ।

एष च चिरदृष्टः कथं पुनरुपनेतव्यो
नाथ मां पराधीनां त्वयि परिगणय सतृष्णाम् ।।[27]

उपसंहारः–

सामुद्रिकशास्त्रस्याधारेण मानवाः अङ्गप्रत्यङ्गानुसारं भविष्यकथनंस्वभाववर्णनञ्च ज्ञातुं शक् ,नुवन्ति । अस्य शास्त्रस्य प्रयोगेण कालिदासः पात्रस्य सौन्दर्यं स्वभावं च निरूपयति । यतो हि नाटकस्य उदाहरणानि अवलोक्य तेषां अङ्गलक्षणैः सह तौलनम् अत्र विधीयते । सामुद्रिकशास्त्रे यत् फलं प्रदीयते तदेव लक्षणस्य फलानुसारं नाटके भविष्यति तथा च पात्रस्य स्वभावे तद्गुणाः दृश्यन्ते एव । अतः कविः स्वकाव्ये पात्रस्य भविष्यकथनायस्वभाववर्णनाय ,, सौन्दर्यस्य कृते सामुद्रिकशास्त्रस्य प्रयोगं करोति इति वक्तुं शक्यते ।

सन्दर्भग्रन्थसूची –

१) **”अभिज्ञानशाकुन्तलम्“**कालिदासः ,चन्द्रकलाव्याख्या –चौखम्बा सुरभारती प्रकाशन, वाराणसी

२) **”मालविकाग्निमित्रम्“**कालिदासः निर्णयसागराख्यमुद्रणालयम् –, मुम्बापुरी

३) **”विक्रमोर्वशीयम्“**कालिदासः निर्णयसागराख्यमुद्रणालयम् ,कल्पलताख्यव्याख्या –, मुम्बापुरी

४) **”सामुद्रिकशास्त्रम्“**कालिदासः चौखम्बा सुरभारती प्रकाशन ,अभयकात्यायानस्य टीका –, वाराणसी

५) **बृहत्संहित“ ा ”**वराहमिहिरः वाराणसी ,चौखम्बा विद्याभवन –

६) **“संस्कृत-वाङ्मय का बृहद् इतिहास षोडश-खण्ड ज्योतिषशास्त्र” -** स्व. पद्मभूषण आचार्य श्री बलदेव उपाध्याय - उत्तर प्रदेश संस्कृत संस्थान, लखनऊ

७) **“नारदसंहिता”**– श्रीवेङ्कटेश्वरमुद्रणालयम् ,मुम्बापुरी

[27] मालविकाग्निमित्रम् २४/

चम्पूरामायणदिशा गङ्गावतरणमाहात्म्यप्रपञ्चनम्

डॉ. व्ही. बालाजी

उपोद्घातः –

असारेऽस्मिन् संसारे दुःखदावाग्निदग्धस्य आधिव्याधिप्रपीडितस्य पापादिविषण्णस्य मायामोहभ्रान्तचेतसो मानववृन्दस्य मनःसन्तापनिवारणाय चेतःप्रसादाय सुखावाप्तये च विद्वद्धौरेयाः तत्वज्ञाः काव्यशास्त्रनामकं रत्नं वाङ्मयमहोदधेः सारभूतम् उददीधरन् । तदुक्तं महर्षिप्रवरेण कपिलमुनिना –

भावानुभूतिमद्वाक्यं रसवत् ध्वनिसङ्गतम् ।
गुणालङ्कारसञ्जुष्टं काव्यं रम्यार्थद्योतकम् ।।[1]

इति । एवं तथाभूतस्य काव्यस्य सर्वप्रथमं लक्षणमित्थमुक्तम् अग्निपुराणे –

संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली ।
काव्यं स्फुरदलंकारं गुणवद् दोषवर्जितम् ।।[2]

इति । एवं शब्दार्थशरीरं काव्यमिति सर्वसम्मतलक्षणमप्यस्ति साहित्यवाङ्मये । तथाभूतस्य काव्यस्य विशेषलक्षणं मम्मटाचार्यैः स्वीय काव्यप्रकाशे इत्थं सन्निगद्यते –"तददोषौ सगुणौ शब्दार्थावनलङ्कृती पुनः क्वापि"[3]इति । तथाभूतस्य सहृदयमनःप्रीतिदायकस्य काव्यस्य उत्तम-अधम भेदेन विभागः कृतः । यस्मिन् काव्ये व्यङ्यार्थः वाच्यात् प्राधान्यं लभते तत्काव्यं -मध्यम ,तदेवोत्तमकाव्यमिति विदुषां मनीषा । यत्र च व्यङ्ग्यस्यास्तित्वेपि तस्याप्राधान्यं ,ध्वनिकाव्यं गुणीभूतमिति। यत्र व्यङ्ग्यासमप्रधानञ्च वर्तते तत्तु मध्यमाख्यंर्थ एव नास्ति तदधममिति ध्वनिकारानुयायिभिः आलङ्कारैः विशेषविभागः कृतः ।

अपि च काव्यस्य सामान्यतया दृश्यं श्रव्यमिति द्विप्रकारतया विभागः कृतः । तत्र श्रव्यकाव्यं त्रेधा संविभक्तं वर्तते गद्यं-पद्यं-चम्पूः इति । तेषां लक्षणं क्रमेणाह - **"अपादः पदसंघातः गद्यम्", "पद्यं चतुष्पदम्", "गद्यपद्यमयी काचित् चम्पूरित्यभिधीयते"** इति ।

तेषु चम्पूविभागेषु बहूनि काव्यानि संविलसन्ति। तेषु भोजराजविरचितं श्रीरामचन्द्रचरितप्रकटनपरं चम्पूरामायणमिति एकं महाकाव्यं चकास्ति।

गङ्गादेव्याः माहात्म्यम् -

तत्र बालकाण्डे गाधिसूनुना रामलक्ष्मणावुद्दिश्य गङ्गादेव्याः माहात्यम्यमधिकृत्य इत्थमुररीक्रियते –

आजानपावनक्षीरां वृषानन्दविधायिनीम्।
श्रुतिप्रणयिनीं सोऽयमापगामाप गामिव ॥[4]

सोऽयं श्रीरामः **आजानपावनक्षीरां** – आजानपावनं स्वभावशुद्धं क्षीरं यस्यास्ताम् **आजानपावनक्षीरां** गङ्गामाप इत्यर्थः। **'शुद्धं भागीरथीजलं'** इति वचनानुरोधेन स्वजन्मनः प्रभृति पावनभूतां नाकलोकतरङ्गिनीं प्राप्तवानित्यर्थः। तत्र प्रयुक्तः आजानशब्दः स्वभावे रूढः। अथवा – जनानां समूहः जानं 'तस्य समूहः' इत्यण् प्रत्ययः। आ समन्तात् बहिराभ्यन्तरे च जनसमूहं पावति स्नानपानाभ्यां पवित्रीकरोतीत्याजानपावनं क्षीरं यस्यास्तां **आजानपावनक्षीरां,** तत्रोपयुक्तक्षीरशब्दः जलार्थद्योतकः **'क्षीरं स्यान्नीरदुग्धयोः'** इति रत्नमालावचनात्। **वृषानन्दविधायिनीम्** – वृषैर्यमनियमादिभिर्धर्मैः य आनन्दं विदधातीति वृषानन्दविधिनीम्। तीर्थविशेषस्नाननियमादि- कर्मणां निःश्रेयसहेतुत्वेन शास्त्रप्रसिद्धेर्बाह्यानन्दकरीमित्यर्थः। यद्वा वृषाणामानन्दमुल्लासं विदधातीति, अर्थात् धर्मादिभिर्वृद्धिकरीमित्यर्थः। समस्तधर्मनिर्वहनद्वारा निरतिशयानन्दसंधायिनीमित्यर्थः। **'वृषः स्याद्वासवे धर्मे सौरभेये च शुक्लजे। पुंराशिभेदयोः श्रृङ्ग्यां मूषिकश्रेष्ठयोरपि॥**[5]**'** (इति विश्वः), **'सुकृते वृषभे वृषः'** इति अमरकोषे निगदितत्वाच्च। **श्रुतिप्रणयिनीम्** – श्रुतिपरिचिताम् उत वेदप्रतिपाद्यमिति वा , अर्थात् **'सितासिते सरिते यत्र संगते'** इत्यादि श्रुतिप्रसिद्धत्वादित्यर्थः। **'प्रणयः स्यात्परिचये यान्त्रायां सौहृदेऽपि च'**[6] इति यादवकोषेऽपि निगदितत्वात्। अथवा तरङ्गसंगतघुमघुमध्वनिभिः श्रोत्रानन्दकरीमित्यप्यर्थः स्फुरति। यतो हि – **'श्रुतिः श्रोत्रे तत्राम्नाये वार्तायां श्रोत्रकर्मणि'** इति विश्वाख्यकोषे प्रतिपाद्यमानत्वात्। **आपगाम्** – अपां समूहः आपम् समूहार्थेऽण् प्रत्ययः। तेनगच्छतीत्यापगा (अन्येष्वपि दृश्ते इत्यनेन डप्रत्ययः) तथाभूतां तां भागीरथीं, लक्षणया तत्कूलं गामिव प्राप्तवान् रामचन्द्रः इति पद्यार्थः। परन्तु अत्र गामिव इति उपमाप्रयोगात् पद्ये यानि विशेषणपदानि संप्रयुक्तानि वर्तन्ते, तानि सर्वाणि धेनुविषयेऽपि समन्वेति। तद्यथा – **आजानपावनक्षीरां** – आजन्मशुद्धं दुग्धं यस्यास्तामत्यर्थः। **वृषानन्दविधायिनीम्** –

वृषभस्यानन्दं विदधाति रतिप्रदत्वादित्यर्थः । **श्रुतिप्रणयिनीम्** – श्रुतिसखीं तत्कलपामित्यर्थः । '**चत्वारि वाक्परिमितापदानि**' इति श्रुत्या वेदवाचो धेनुत्वेन निरूपितत्वादिति धेनुशब्देऽपि विशेषणपदानां सामञ्जस्यत्वं दरीदृश्यते, इत्यत्र पद्ये श्लेषोपमानयोः संसृष्टिः विद्यत इति।

ततः मन्दाकिन्युपाख्यानं श्रोतुकामाय रामचन्द्राय कुशिकनन्दनः इत्थमभाषत – पुरा मेरुपर्वतस्य मनोरमेत्यभिधया एका कन्या आसीत्, धराभृतां चक्रवर्ती पर्वतसार्वभौमो हिमवान् तया सह सञ्जातपरिणयोत्सवेन गृहमेधी आसीत् । ततः मनोरमाजानेर्हिमवतोः द्वे कन्ये समुत्पन्ने आस्तां । तयोः कन्यकयोर्मध्य एका आद्या कन्या मन्दाकिनीति नाम्ना प्रसिद्धाभूत्, अन्या द्वितीया कन्या साक्षाद्भगवती चन्द्रचूडकुटुम्बिनी आसीत् । ततः विबुधाः तां मन्दाकिनीं याञ्चापूर्वकं हिमवन्नियोगात् प्राप्य नाकलोकं अनीनयत्, ततः प्रभृति सा सुरलोकतरङ्गिणी तत्रैव निवसमाना आसीत् ।

वियद्गङ्गावतरणवृत्तान्तः –

पुरा अयोध्याख्यपुरं सवितृवंशोद्भवेन सगरेति नाम्ना राज्ञा परिपालितमासीत् । तेन केशिनीसुमतीभ्यां सह परिसमापितविवाहेन प्रथमाश्रमो लङ्घितः । ततः पुत्रानात्मनः इच्छन् सः सगरः सपत्नीकः हिमालयपर्वतं सम्प्राप्य तपस्तेपे । ततः हिमवत अनुग्रहात् केशिनी ज्येष्ठपत्नी असमञ्जमिति नाम्ना सुतमेकं लेभे, यवीयसी सुमतिश्च षष्टिसहस्रसंख्याकान् पुत्रान् प्रापयामास । ततः सः सगरः अश्वमेधाख्यं यागविशेषं कर्तुमेकदा प्रारेभे , तदा यागाङ्गत्वेन समुदितमश्वमोचनं कृतवान्, सोऽयमश्वमेधीयाश्वः राक्षसवेषधारिणा इन्द्रेण स्वपदभ्रंशभात् अहारि। ततः अश्वमेधीयाश्वहरणज्ञानानन्तरं सौमतेयाः पुमांसः षष्ठिसहस्रसंख्याकाः सगरपुत्राः अपहृतं तं यज्ञीयाश्वमन्वेष्टुं प्रतस्थिरे । ततः यज्ञीयाश्वमन्विष्यन्तः सगरपुत्राः नखैरेव पातालपर्यन्तं भुवं चख्नुः, इन्द्रोऽश्वमपहृत्य कपिलमुनेराश्रमसमीपे निबद्धवान् । सगरपुत्रास्तत्राश्वं दृष्ट्वा कपिलेनैवाश्वोऽपहृत इति मत्वा तमवमानयन्तः कपिलकोपाग्नौ भस्मतां गताः, अथ षष्टिसहस्रपुत्रमरणानन्तरं असमञ्जस्य पुत्रम् अंशुमान्तं यागीयाश्वं समानीय सप्ततन्तुं समापयत्विति सगरोऽब्रवीत्, अंशुमानपि पातालाभ्यन्तरं गत्वा तत्र बिले कपिलक्रोधाग्निना भस्मीकृतान् पितॄन् दृष्ट्वा बाष्पाकुलाक्षस्सन् तेभ्यः पितृभ्यः तर्पणाढ्जलिं दित्सुः जलान्वेषणाय पर्यटन् तुरङ्गमं लेभे, तदा तेषां सुमतिपुत्राणां मातुलः गरुडः अंशुमन्तम् अनेन प्रकारेण इत्थमब्रवीत् – 'आयुष्मन्, इह पातले गङ्गामानय, एषा गङ्गा भस्मीकृतानां समेषां सुमतिपुत्राणां सर्वोत्तमस्तरणोपायः' इति, तदनन्तरं पुत्राणां विनाशवार्तां श्रुत्वा अंशुमतानीतागीयाश्वं लब्ध्वा प्रारब्धं यज्ञं परिसामाप्य

षष्टिसहस्रपुत्रमरणजनितशोकाद्दिवं गतः, तदनन्तरं सगरपौत्र अंशुमान् राज्यं चिरकालं परिपाल्य दिलीपे न्यस्तभूभारः हिमालयनाम्ना प्रसिद्धे पर्वते गङ्गायाः भूलोकावतरणा तपस्तेपे, ततः कालगमने दीलपोऽपि स्वीय पुत्राय भगीरथाय कपिलकोपाग्निना स्वपूर्वजानां दहनं तेषामुद्धारनार्थं मातुलोपदिष्टं गङ्गावतरणवृत्तान्तादिकं सन्निगदितवान्, ततः प्रभृति भगीरथः अमर्त्यसरितं मर्त्यतरङ्गिणीं कर्तुं समुद्यतो बभूव, सद्यैव गङ्गादेवीमुद्दिश्य तपश्चचार भगीरथः, तस्य तीव्रतपःप्रभावेन समाविर्भूता देवगा गङ्गा भूलोकागमनाय अङ्गीचकार, तदा तां वोढुं पार्वतीकान्तेन शिवेनैव शक्य इति तया संप्रोक्ता, तदर्थं गोकर्णाभिधं सिद्धक्षेत्रमासाद्य भगीरथः देवापगां वोढुं शिवमुद्दिश्य तपस्तेपे, स्वात्युग्रतपोऽनुष्ठानेन समानन्दितः परमेश्वरः तां विबुधसरितं वोढुम् अन्वमंस्त । इदानीं सा सुरलेकतरङ्गिणी भूलोकं प्रति कथमागच्छतीति कवि इत्थं वर्णाति –

अथ वीचीचयच्छन्नदिगन्तगगनान्तरा ।
शशाङ्कशङ्खसंभिन्नतारामौक्तिकदन्तुरा ।।[7]
तरङ्गाकृष्टमार्तण्डतुरङ्गायासितारुणा ।
फेनच्छन्नस्वमातङ्गमार्गणव्यग्रवासवा ।।[8]
आविः शाखाशिखोन्नेयनन्दनद्रुमकर्षणा ।
एकोदकनभोमार्गदिङ्मूढदिवसेश्वरा ।।[9]
आवर्तगर्तसंभ्रान्तविमानप्लवविप्लवा ।
नीलजीमूतशैवालकृतरेखा हरित्तटा ।।[10]
अवलेपभराक्रान्ता सुरलोकतरङ्गिणी ।
पपात पार्वतीकान्तजटाकान्तारगह्वरे ।।[11]

<u>पद्यानामयमर्थः</u> –

वीचीचयच्छन्नदिगन्तगगनान्तरा – वीचीचयैः तरङ्गपरम्पराभिः छन्नं दिगन्तः नभोमध्यञ्च यस्याः सा वीचीचयच्छन्नदिगन्तगगनान्तरा इति । **शशाङ्कशङ्खसंभिन्नतारामौक्तिकदन्तुरा** – शशाङ्क एव शङ्खः, तेन संभिन्नानि (संगतानि) तारा एव मुक्तामणयः तैः दन्तुरा इति । स्वर्गादापतन्त्या गङ्गया तरङ्गमालया दिगन्तो नभोमध्यञ्च व्याप्तमभवत्, तदानीं चन्द्ररूपशङ्खेन सङ्गैस्तारारूपमुक्तामणिभिर्गङ्गाऽपि व्याप्ताऽजायत इत्यर्थः ।

तरङ्गाकृष्टमार्तण्डतुरङ्गायासितारुणा – तरङ्गै आकृष्टाः स्वमार्गादपसार्यान्यत्र प्रवर्तिताः ये मार्तण्डतुरङ्गाः, तैः आसितः स्वमार्गप्रवर्तनेन परिश्रान्तः अरुणः यया सा

तरङ्गाकृष्टमार्तण्डतुरङ्गा- यासितारुणा इति । **फेनच्छन्नस्वमातङ्गमार्गणव्यग्रवासवा** – फेनैः आच्छादितः ऐरावतः तस्य अन्वेषणे उद्विग्नः इन्द्रः यया सा फेनच्छन्नस्वमातङ्गमार्गणव्यग्रवासवा इति । फेनैः सर्वेषां जन्तूनां धवलीकृतत्वादैरावतस्य धवलत्वेन विविच्य ग्रहणेऽशक्ततयेन्द्रो व्यग्रतां प्रापित इति भावः ।

आविः शाखाशिखोन्नेयनन्दनद्रुमकर्षणा – आविः प्रत्यक्षाः याः शाखाग्रभागास्ताभिरुन्नेयं पारिजातादिनन्दनोद्यानतरूणां कर्षणं यस्याः सा इति विग्रहः, गङ्गाप्रवाहे पारिजातादयो नन्दनवृक्षा अवहन्, जलनिमग्नानां तेषां शाखाशिखा एवोपरिदृश्यमाना गङ्गाप्रवाहेण तत्तरूणां वाह्यमानत्वमभिव्यञ्जन्तीत्यर्थः। **एकोदकनभोमार्गदिङ्मूढदिवसेश्वरा** – एकोदकं केवलजलाप्लुतं यन्नभः तस्मिन् मार्गे दिशाज्ञानहीनः सूर्यः यया सा इति, सम्पूर्णस्य नभसो जलमयत्वात्सूर्यः स्वमार्गनिर्धारणे व्यामोहं गत इति भावः ।

आवर्तगर्तसंभ्रान्तविमानप्लवविप्लवा – आवर्ताः अम्भसां भ्रमाः त एव गर्ताः विवराणि तेषु संभ्रान्ताः विमानाः तेषां मज्जनोन्मज्जनं च यस्याः सा आवर्तगर्तसंभ्रान्तविमानप्लवविप्लवा इति । गङ्गायाः गर्ताकारवर्तेषु विमानाः मज्जन्ति उन्मज्जन्ति चेत्यर्थः । **नीलजीमूतशैवालकृतरेखा हरित्तटा** – नीलजीमूताः श्याममेघाः एव शैवालानि तैः विरचिततटावबोधकसीमाचिह्नाः दिशः एव तटाः यस्याः सा **नीलजीमूतशैवालकृतरेखा हरित्तटा** इति । दिश एव गङ्गायाः तटाः सन्ति, यत्र श्यामलमेघरूपतटपरिसरचारिशैवालानि तटावबोधकसीमारेखा इव विरचयन्तीत्यर्थः ।

'को वा मदीयं वेगं सोढुं समर्थः' इतिरूपो गर्वः, तस्य भरेण आक्रान्ता सुरलोकतरङ्गिणी पार्वतीकान्तस्य जटाकान्तारे महाकुहरस्य मध्यप्रदेशे अवततार, तदानीं शिवः तस्याः अवलेपं दूरोत्सारितुमित्थम् समाचरितवान् –

अलब्धनिर्गमा शम्भोः कपर्दादमरापगा ।
दधौ दूर्वाशिखालग्नतुषारकणिकोपमाम् ।।[12]

अमरापगा शम्भोः जटाजूटात् बहिर्गन्तुमसमर्था आसीत्, तदा शिखायामग्रभागे संसक्ता हिमबिन्दुस्तस्याः सादृश्यं धृतवती, स्वगर्वं चूर्णयितुं शम्भुनेत्थं समाचरितमित्यर्थः। एतेन हरजटाजूटस्य विशालत्वं, तदपेक्षया गङ्गायाः समधिकाल्पत्वञ्च ध्वनितम् । ततः –

अदृष्ट्वा तां नदीं तत्र तुष्टाव परमेश्वरम् ।
भगीरथो विधेः क्रौर्यात्परिक्षीणमनोरथः ।।[13]

तत्र भगीरथः हरजटाजूटे तां सुरसरितम् अदृष्ट्वा दैवस्य प्रातिकूल्यात् प्रणष्ट-गङ्गानयनरूपमनोरथस्सन् परमेश्वरं गङ्गायाः बहिर्निर्गमनार्थं स्तुतवान् । तेन सन्तुष्टः शम्भुः तामित्थं विमुक्तवान् –

गङ्गा सप्ताकतिर्जाता न्यपतद्धरमूर्धनि ।
तेन स्तुत्या प्रसन्नेन क्षिप्ता बिन्दुसरस्यपि ।।[14]

गङ्गा एकधाराभावेन पतिष्न्त्या मम वेगं हिमवान् न सहेत इति मत्वा स्वां धारां सप्तभिर्विभागैर्विभज्य सप्तस्रोतस्वती जातेत्यर्थः, धरमूर्धनि – धरतीति धरः पर्वतः हिमालयः अस्य शिखरे पपात। भगीरथकृतस्तोत्रेण प्रसन्नेन हरेण सा गङ्गा बिन्दुसरो नामके कासारविशेषेऽपि भगीरथसौकर्याय निक्षिप्ता इत्यर्थः । ततः तस्याः चलनमित्थमुपवर्णितम् –

तासु प्राचीं गतास्तिस्रः तिस्रः प्राचेतसीं दिशम् ।
अन्या पितृक्रियोद्युक्तभगीरथपथानुगा ।।[15]

तासु गङ्गायाः सप्तसु धारासु तिस्रः धाराः पूर्वदिशं, तिस्रः धाराः पश्चिमदिशं गताः, अवशिष्टा एका धारा पितृक्रियायां स्वपूर्वजोद्धारे उद्युक्तस्य भगीरथपथमनुचचालेत्यर्थः । ततः तस्याः जाह्नवी इति नाम कथं जातमिति इत्थं समुपवर्ण्यते –

सैषा भागीरथी जह्नोः सत्रक्षेत्रं समावृणोत् ।
तां स पीत्वा ततः शान्तो जहौ श्रोत्रेण वर्त्मना ।।[16]

सा भागीरथी जह्नुरित्याख्यस्य मुनेः यज्ञभूमिं समन्तादावृतवती, तस्माद्धेतोः सः जह्नुः गङ्गायास्तदाचरणकोपाय तां निपीय, भगीरथकृतस्तुत्या शान्तकोपः तां गङ्गां श्रोत्रेण वर्त्मना निःसारितवानित्यर्थः ।

उपसंहारः –

भगीरथस्य परिपूर्णमनोरथत्वमित्थं कविना सन्निगद्यते –

तया तटिन्या जाह्नव्या प्रापयत्त्रिदिवं पितॄन् ।
भगीरथः पुरं प्राप परिपूर्णमनोरथः ।।[17]

सः भगीरथः ता जाह्नव्या तटिन्या स्वपूर्वजान् कपिलकोपानलभस्मीकृतान् सुमतिपुत्रान् स्वर्गलोकनिवासिनश्चकार, ततः परिपूर्णमनोरथः सफलाभिलाषः सन् पुरीमोध्यामाजगामेत्यर्थः ।

उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः । न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।।, यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः इत्यादि वचनानुगुणं सूर्यवंशोद्भः भगीरथः स्वपूर्वजानां पितृलोकवासप्राप्त्यर्थं, धरण्यां संभ्रमणार्थञ्च, अत्यन्तपावनभूतां विबुधैकानुभवयोग्यात्मिकां अमर्त्यतरङ्गिणीं मर्त्यापगां कर्तुं बहुवारं नैकानेकप्रकारेण तीव्रातिशयतपोऽनुष्ठानेन च ऐहिकलोकाख्यं कर्मभूमिं प्रति समानयनाञ्चकार । इत्थम् अस्माभिरपि **कर्मण्येवाधिकारस्ते मा फलेषु कदाचन** इत्यादि सूक्तिं मनसि निधाय वयं सर्वे सर्वदा जीवनप्रगतिं प्रति समुद्यमानाः भवेम।

---------इति शम्-------

End notes – अन्त्यसूची

1. **संस्कृतनिबन्धशतकम् – पद्मश्री डा .डा ,आचार्यैः लिखितम् कपिलदेव द्विवेदी . – विश्वविद्यालय प्रकाशन ,द्विवेदी महोदयैः सङ्कलितम् .डि.के वाराणसी, 2008 तमे वर्षे प्रकाशितम्, ISBN : 978-81-7124-644-1. पृष्ठसंख्या – .57**

2. **अग्निपुराणं (607 .337), संस्कृतनिबन्धशतकम् – पद्मश्री डा कपिलदेव द्विवेदी . विश्वविद्यालय ,द्विवेदी महोदयैः सङ्कलितम् .डि.के .डा ,आचार्यैः लिखितम् – प्रकाशन वाराणसी, 2008 तमे वर्षे प्रकाशितम्, , ISBN : 978-81-7124-644-1. पृष्ठसंख्या .57**

3. **काव्यप्रकाशः – मम्मटभट्टविरचितः, झळकीकरोपनाम्ना रामभट्टात्मजेन भट्टवामनाचार्येण विरचितया बालबोधिन्याख्यव्याख्यया समन्वितः, दशरथात्मजेन**

नारायणेन संशोधितश्च, चौकम्बा पब्लिकेषसनस् द्वारा 2012 तमे वर्षे प्रकाशितम् , पृष्ठसंख्या – 16.

4. चम्पूरामायणम् – श्रीभोजराजसार्वभौमराजेन विरचितम्, श्रीलक्ष्मणसूरिविरचितं युद्धकाण्डसहितश्च, श्रीरामचन्द्रबुधेन्द्रविरचितया व्याख्यया समेतम्, सप्तमं संस्करणम्, मुम्बय्यां पाण्डुरङ्ग जावाजी इत्येतैः स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितम्, 1929, पृष्ठसंख्या – 47.

5. चम्पूरामायणम् – श्रीभोजराजसार्वभौमराजेन विरचितम्, श्रीलक्ष्मणसूरिविरचितं युद्धकाण्डसहितश्च, श्रीरामचन्द्रबुधेन्द्रविरचितया व्याख्यया समेतम्, सप्तमं संस्करणम्, मुम्बय्यां पाण्डुरङ्ग जावाजी इत्येतैः स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितम्, 1929, पृष्ठसंख्या – 48.

6. चम्पूरामायणम् – श्रीभोजराजसार्वभौमराजेन विरचितम्, श्रीलक्ष्मणसूरिविरचितं युद्धकाण्डसहितश्च, श्रीरामचन्द्रबुधेन्द्रविरचितया व्याख्यया समेतम्, सप्तमं संस्करणम्, मुम्बय्यां पाण्डुरङ्ग जावाजी इत्येतैः स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितम्, 1929, पृष्ठसंख्या – 48.

7. श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 76.

8. श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 77.

9. श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 77.

10. श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 78.

11. **श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 78.**

12. **श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 79.**

13. **श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 79.**

14. **श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 80.**

15. **श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 80.**

16. **श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 80.**

17. **श्रीभोजराजसार्वभौमविरचितं चम्पूरामाणम् – श्रीरामनाथ त्रिपाठी शास्त्रिणा विरचित कल्याणीति संस्कृत-हिन्दीव्याख्योपेतम् , चौखम्बा कृष्णदास अकादमी – वाराणसी, 2016, पृष्ठसंख्या – 79.**

******

राष्ट्रियशिक्षानीतौ प्रतिबिम्बितम् औपनिषदिकं शिक्षादर्शनम्

डॉ. कल्पना आर्या

शोधसारः–

विश्वस्मिन्विश्वे वैदिकवाङ्मयं प्राचीनतमसाहित्यमस्तीति सर्वैरपि विद्वद्भिः सहर्षमङ्गीक्रियते। वैदिकसाहित्यमिदम् अत्यन्तविस्तृतं सुसङ्घटितञ्च वर्तते, यच्च संहिता-ब्राह्मण-आरण्यक-उपनिषत्सु चतुर्षु भागेषु विभक्तम्। वैदिकवाङ्मयस्य विकासक्रमे आरण्यकानामनन्तरमुपनिषदां स्थानमस्ति। उपनिषत्शब्देन तात्पर्यं **'समेषाम् अर्थोत्पादकानां सांसारिकक्रियाकलापानां विमोहकर्त्री विद्या'** इति। उपनिषत्सु गुरुशिष्ययो: संवादरूपेण आत्मा-ब्रह्म-जगत्-इत्यादिगूढविषयाणां सरलतापूर्वकं प्रतिपादनमस्ति। भारतीयसंस्कृते: मान्यतानुसारं शिक्षा मुक्तिदात्री भवति – **'सा विद्या या विमुक्तये'**। शिक्षाव्यवस्था संस्कृतिसमाजयोः विकासाय आधारभूता भवति। यस्या: दयनीयस्थित्या भारतशासनेन नूतनशिक्षानीतेः आवश्यकता अनुभूता। एतदर्थमेव ख्रीष्टस्य २०२० तमवर्षे नूतनराष्ट्रियशिक्षानीतिः (NEP-2020) निर्मिता। इयं भारतीयसंस्कृतेः महनीयतत्त्वैस्सह अर्वाचीनवैज्ञानिकदृष्टिकोणैः समन्विता अस्ति। एतस्यामुपनिषदाम् उदात्तविचाराणां प्रतिष्ठापनार्थं कीदृश: प्रयास: विहित: ? इति शोधपत्रेऽस्मिन् परिशीलनीयमस्ति।

राष्ट्रियशिक्षानीतौ विद्यालयी शिक्षा, उच्चतर-शिक्षा, अन्याः केन्द्रीयविचारणीयाः बिन्दवः, क्रियान्वयनस्य रणनीतिश्चैते चत्वारः भागाः सप्तविंशति-अध्यायाश्च सन्ति। अत्र भारतीयभाषाभिः स्वकीयज्ञानपरम्पराया: सांस्कृतिकसम्पदश्च ज्ञानं मुख्यं ध्येयमस्ति। राष्ट्रियशिक्षानीतिः उपनिषदां शिक्षादर्शनमुद्दिश्य निर्मिता। यस्य प्रभाव: नूतनशिक्षानीते: आलोके निर्मितायाम् 'आधारभूतस्तरस्य राष्ट्रियपाठ्यचर्याया: रूपरेखायाम्[1] अपि दरीदृश्यते। या तैत्तिरीयोपनिषद: "पञ्चकोशविकासः" इत्यनेन सम्बद्धाऽस्ति। व्यक्तित्वनिर्माणप्रक्रियासन्दर्भे एते पञ्चकोशा: अत्यन्तप्रभावशालिन: भवन्ति।[2] राष्ट्रियपाठ्यचर्याया: रूपरेखानुरूपं राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदा पञ्चकोशविकासमुद्दिश्य नूतनपाठ्यपुस्तकानां निर्माणमारब्धम्। राष्ट्रियशिक्षानीतौ उपनिषदां तर्कः, प्रश्नः संवादश्च इत्यादिविधीनामनुगुणमधिगमस्य विभिन्नयुक्तय: अनुसृता:। अनेन उपर्युक्तविमर्शेण स्पष्टमस्ति यत्

औपनिषदिकशिक्षादर्शनं भारतीयसंस्कृतौ महनीयं रत्नमिव प्रतिभाति। उपनिषदां शिक्षादर्शनस्य पञ्चकोशादितत्त्वानामङ्गीकरणेन राष्ट्रियशिक्षानीतौ अस्य स्पष्टप्रभाव: दरीदृश्यते।

कूटशब्दाः- उपनिषद्, भारतीयः, शिक्षानीतिः, संस्कृतिः, राष्ट्रियः वेदः NCERT

शोधलेखः–

भारतीयसंस्कृते: मान्यताया अनुसारं शिक्षा मुक्तिदात्री भवति, तदाह – **'सा विद्या या विमुक्तये'**। शिक्षाया: माध्यमेन व्यक्ते: चरित्रस्य निर्माणं भवति। शिक्षयैव मानवीयगुणानां सर्वाङ्गपूर्ण: विकासोऽपि सम्भवति। अतः एव प्रत्येकं समाज: उत्तमशिक्षाव्यवस्थाया: कामनां करोति। शिक्षाव्यवस्था संस्कृतेः समाजस्य च विकासाय आधारभूता भवति। यस्या: दयनीयस्थितेः कारणेन नूतनायाः शिक्षानीतेः आवश्यकता अनुभूता। अपि च जगत: परिवर्तनशीलत्वात् निश्चिते समयान्तराले नवनीतीनां निर्माणम् अपेक्ष्यते। एतदर्थमेव ख्रीष्टस्य २०२० तमे वर्षे भारतशासनेन नूतना राष्ट्रियशिक्षानीतिः (NEP-2020) निर्मिता। इयं भारतस्य प्राचीनसंस्कृतेः महनीयतत्त्वैः सह अर्वाचीनवैज्ञानिकदृष्टिकोणैः समन्विता अस्ति। एतस्यां राष्ट्रियशिक्षानीतौ उपनिषदाम् उदात्तविचाराणां प्रतिष्ठापनस्य कीदृश: प्रयास: विहित:? इत्यत्र अस्मिन् शोधपत्रे परिशीलनीयम् अस्ति।

विश्वस्मिन्विश्वे वैदिकवाङ्मयं प्राचीनतमं साहित्यम् अस्तीति सर्वैरपि विद्वद्भिः सहर्षम् अङ्गीक्रियते। भारतीयसंस्कृतौ वैदिकवाङ्मयस्य व्यापक: प्रभाव: महत्त्वपूर्णं स्थानं च वर्तते। मानवजातेः प्राचीनतमः इतिहासः, सामाजिकनियमः, सदाचारः, दर्शनम्, कला, संस्कृतिः धर्मश्च इत्यादीनाम् आधारः वेद एव भवति। वेदानां महनीयगौरवस्य वर्णनं कुर्वता भगवता मनुना निगदितं यत् –

"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनाम् आत्मनस्तुष्टिरेव च ॥
'यः कश्चित् कस्यचिद् धर्मो मनुना परिकीर्तितः।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः' ॥[3]

वैदिकवाङ्मयं भारतीयसंस्कृतेः, आध्यात्मिकजीवनस्य सांस्कृतिकविकासस्य च ज्ञानाय कोशग्रन्थ इव प्रमाणस्वरूपं वर्तते। साहित्यमिदं सहस्राब्दिभिः प्रचलितमस्ति। भारतीयसंस्कृते: परिपूर्णं ज्ञानमस्य समुचितं रसास्वादं विना नैव सम्भवति। वैदिकं साहित्यमिदम् अत्यन्तं विस्तृतं सुसङ्घटितञ्च वर्तते, यच्च संहिता, ब्राह्मणम्, आरण्यकम् उपनिषत् चैतेषु चतुर्षु भागेषु

विभक्तमस्ति। एतेषु वेदशब्देन मुख्यतया मन्त्ररूपेण संहिताभागस्य ग्रहणं भवति; ब्राह्मणानि आरण्यकानि उपनिषदश्च वेदमन्त्राणां भाष्यं व्याख्या वा भवन्ति।

वैदिकवाङ्मयस्य विकासक्रमे आरण्यकानां पश्चात् उपनिषदां स्थानं भवति। वैदिकसाहित्यस्य अन्तिमभागत्वेन उपनिषद्ग्रन्थाः 'वेदान्त:' इत्यनया संज्ञया अपि व्यवह्रियन्ते। उपनिषत्सु आत्मज्ञानम्, मोक्षज्ञानम्, ब्रह्मज्ञानञ्च इत्यादितत्त्वानां प्राधान्यं भवति। अत एव उपनिषद: आत्मविद्या, मोक्षविद्या ब्रह्मविद्या चेति नाम्नाऽपि ज्ञायन्ते। उपनिषत्शब्देन तात्पर्यं **'समेषाम् अर्थोत्पादकानां सांसारिकक्रियाकलापानां विमोहकर्त्री विद्या'** इति वर्तते। उपनिषदाम् अध्ययनेन ऐहिकविषयेषु वैराग्यं जायते, तस्मात् संसारस्य बीजभूता विद्या विनष्टा भवति। अत: जीवः अविद्यायाः बन्धनाद्विमुच्य ब्रह्मज्ञानस्य प्राप्तावपि समर्थः भवति।

उपनिषत्साहित्यम् आध्यात्मिकज्ञानस्य स्रोतांसि भवन्ति। उपनिषत्सु गुरुशिष्ययो: संवादरूपेण आत्मा, ब्रह्म, जगत् इत्यादीनां गूढविषयाणां सरलतापूर्वकं प्रतिपादनं जातम्। उपनिषदां संख्या शताधिकं मन्यते। वेदस्य शाखानां ब्राह्मणानाम् आरण्यकानां च सदृशमेव कालचक्रे अधिकांशोपनिषदः लुप्तप्रायताम् अवाप्नुवन्। मुक्तिकोपनिषदि दशोपनिषद: समुल्लिखिता: वर्तन्ते। तद्यथा –

'ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः।
ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश'।। इति।

उपनिषदः अध्यात्मविद्याया: दर्शनस्य च अद्वितीया: ग्रन्था: सन्ति। औपनिषदिके शिक्षादर्शने ब्रह्म, जीव:, जगत्, अध्यात्मश्च इत्येतेषां विषये चिन्तनं भवति। उपनिषदां माहात्म्यम् इदं वर्तते यत् तेषाम् उत्तरवर्तिग्रन्थेषु अध्यात्मदर्शनस्य प्रभावो दृश्यते। न केवलं पुरातनकाले एव प्रत्युत 'साम्प्रतम् अपि न कोऽपि एतादृश: जन: स्यात्, यस्य हृदये उपनिषदां विशुद्धानां प्रश्नानां पवित्राणां विचाराणां च अध्ययनेन नूतनानां भावानाम् उदयानुभूति: न भवेत्, य: स्वस्य चक्षुषां समक्षं नवप्रकाशं न पश्येत्'। यद्यपि उपनिषद: ज्ञानकाण्डरूपेण अध्यात्मविद्याया: प्रतिपादनं कुर्वन्ति, तथापि साधारणमनुष्यै: स्वकीयजीवने कथं कर्म कर्तव्यम् ? इत्यस्य उल्लेखनम् अपि उपनिषत्सु प्राप्यते।

वेदोपनिषत्कालीना भारतीया ज्ञानपरम्परा कालातिवर्तिनी वर्तते। या हि वैदिककालात्परं बौद्धकाले, जैनकाले तदुत्तरवर्तिकाले चापि सततं प्रचल्यमाना आसीत्। समृद्धा भारतीया ज्ञानपरम्परेयं मुगलानाम् आङ्ग्लानां च शासनै: ह्रासत्वम् उपागता। एतस्या: पुनरुज्जीवनाय

अस्माकं शिक्षाव्यवस्थायां नीतिगतं परिवर्तनम् अपेक्षितं भवति। अत एव स्वातन्त्र्योत्तरकाले ख्रीष्टस्य 1948, 1952, 1964, 1968, 1986, 1992 वर्षेषु भारतीयशासनेन विभिन्नसमितय: संघटिता:। याभि: शिक्षाव्यवस्थाया: तत्सम्बद्धनीतीनां निर्धारणस्य च कार्यं विहितम्। किन्तु स्वतन्त्रतायाः प्राप्तेरनन्तरं वाममार्गिविचारै: प्रभावितजना: भारतीयशासनस्य उच्चपदेषु समारूढा:। अपि च शीर्षनीतिनिर्माणस्य संस्थासमित्यादिषु तेषाम् एकाधिकार: अभवत्। तस्मात् अस्माकं सनातनसंस्कृतिं तद्विशालवैदिकज्ञाननिधिं च प्रति पूर्वाग्रहपूर्ण: व्यवहार: जात:। परिणामत: भारतस्य शिक्षाव्यवस्थाया: स्वरूपम् एव परिवर्तितं जातम्। यस्या: ज्ञानपरम्पराया: प्रचार: प्रसार: सम्मानं च करणीयम् आसीत्; तां प्रति अज्ञानम्, अनभिरुचि: दुराग्रहश्च स्यात् इत्यस्य कुटिल: प्रयास: जात:। एतेषां दुर्गुणानाम् उपशमनार्थमेव भारतशासनेन भारतस्य प्राचीनज्ञानपरम्पराया: अनुगुणं राष्ट्रियशिक्षानीते: निर्माणं कृतम्।

राष्ट्रियशिक्षानीतौ निम्नोक्ताः चत्वारः भागाः सन्ति – विद्यालयी शिक्षा, उच्चतर-शिक्षा, अन्याः केन्द्रीयविचारणीयाः बिन्दवः, क्रियान्वयनस्य रणनीतिः चेति। ये हि सप्तविंशति-अध्यायेषु अन्तर्विभक्ता: सन्ति। विकसितभारतस्य संकल्पानुसारं 'शिक्षानीतिरियं ख्रीष्टस्य 2040 तमवर्षपर्यन्तं भारतस्य अद्वितीयशिक्षाप्रणालीं निर्मातुं सफला भविष्यती'[4]त्यत्र एषा कामना विहिता।

अस्यां नवनिर्मितायां राष्ट्रियशिक्षानीतौ बहुविषयी शिक्षा, सर्वाङ्गीण: विकास:, मानवात् मानवतां प्रति, जडत: जगत्पर्यन्तञ्च इत्येते विचारा: समाविष्टा: वर्तन्ते। राष्ट्रियशिक्षानीतौ भारतीयभाषाणां माध्यमेन स्वस्य ज्ञानपरम्पराया: तथा च सांस्कृतिकसम्पद: विषयकम् अवगमनं स्यात् इति ध्येयं वर्तते। यत्र भारतीयभाषा: प्रारम्भिकशिक्षया सह योजिता: सन्ति। अनेन दुर्गमक्षेत्रस्थानां जनानां जीवने धनात्मक: प्रभाव: स्यात्, तद्यथा- यदि आदिवासिक्षेत्रस्थजनानां सन्ततिः स्वकीयानां स्थानीयभाषोपभाषाणां माध्यमेन पठितुमिच्छति चेत् स: सरलतापूर्वकम् अधिगन्तुम् अवसरान् लभेत।

पूर्ववर्तिनीभि: शिक्षानीतिभि: छात्राणां ज्ञानं केवलं जीविकोपार्जनं पर्यन्तमेव सीमितम् आसीत्। तस्मात् कारणात् अवसराणाम् अभावेन निरुद्योगिताया: समस्या प्रवर्धिता जाता। एतादृशीनां समस्यानां समाधानाय नूतनशिक्षानीतौ भारतस्य प्राचीनज्ञानपरम्पराया: विशिष्टं स्थानं कल्पितम्। यस्मिन् योगायुर्वेदाद्या: पारम्परिकनिधय: कौशलाधारिता शिक्षा च पाठ्यक्रमे समाविष्टा: सन्ति। अपि च अस्मिन् क्षेत्रे नूतनानाम् अनुसन्धानकार्याणां माध्यमेन समग्रमानवविकासस्य संकल्पना विकसिता भवेत्।

साम्प्रतिकशिक्षाव्यवस्थाया: नीतिनिर्मातृभिः उपनिषदां शिक्षादर्शनस्य प्रमुखतत्त्वानि उद्दिश्य नूतनशिक्षानीति: निर्मिता। येषां प्रभाव: नूतनशिक्षानीते: आलोके निर्मितायाम् 'आधारभूतस्तरस्य राष्ट्रियपाठ्यचर्याया: रूपरेखा - २०२३' (NCF-FS)[5] इत्यस्यामपि दरीदृश्यते। राष्ट्रियशिक्षाया: नवनीतावस्याम् औपनिषदिकशिक्षादर्शनस्य महत्त्वपूर्णानां तत्त्वानां विनिवेश: सिद्धान्तरूपेण एव न कृत:, प्रत्युत तस्य व्यावहारिकप्रयोगाय अपि प्रयत्नानि प्रारब्धानि। एतदर्थं राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदा (NCERT)[6] राष्ट्रियपाठ्यचर्याया: रूपरेखानुरूपं नूतनपाठ्यपुस्तकानां निर्माणकार्यमपि सम्पादितम्। यस्मिन् औपनिषदिकशिक्षादर्शनस्य प्रतिबिम्ब: पूर्णतया परिलक्षितो भवति।

'आधारभूतस्तरस्य राष्ट्रियपाठ्यचर्याया: रूपरेखा' मुख्यत: तैत्तिरीयोपनिषदि आधारिता वर्तते। या हि तैत्तिरीयोपनिषद: "पञ्चकोशविकासः" इत्यस्य आधारभूतावधारणया सम्बद्धा वर्तते। ते च पञ्चकोशा: भवन्ति - अन्नमयकोशः, प्राणमयकोशः, मनोमयकोशः, विज्ञानमयकोश: आनन्दमयकोश: चेति। तैत्तिरीयोपनिषदि ब्रह्मवल्ल्याम्[7] एतेषां पञ्चकोशानां वर्णनमित्थं विहितम्-

१. **अन्नमयकोश:** - "स वा एष पुरुषोऽन्नरसमयः तस्येदमेव शिरोऽयं दक्षिण: पक्षः, अयमुत्तरः पक्षः, अयमात्मा, इदं पुच्छं प्रतिष्ठा"।

२. **प्राणमयकोश:** - "तस्माद् वा एतस्मादन्नरसमयात् अन्योऽन्तर आत्मा प्राणमयः। तेनैष पूर्णः। स वा पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य प्राण एव शिरः। व्यानो दक्षिण: पक्षः। अपानमुत्तरः पक्षः। आकाश आत्मा। पृथिवी पुच्छं प्रतिष्ठा"।

३. **मनोमयकोश:** - "तस्माद्वा एतस्मात् प्राणमयात् अन्योऽन्तर आत्मा मनोमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य यजुरेव शिरः। ऋग्दक्षिणः पक्षः। सामोत्तरः पक्षः। आदेश आत्मा। अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा"।

४. **विज्ञानमयकोश**: - "तस्माद् वा एतस्मान्मनोमयात्, अन्योऽन्तर आत्मा विज्ञानमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य श्रद्धैव शिरः। ऋतं दक्षिणः पक्षः। सत्यमुत्तरः पक्षः। योग आत्मा। महः पुच्छं प्रतिष्ठा"।

५. **आनदमयकोश**: - "तस्माद्वा एतस्माद् विज्ञानमयात्, अन्योऽन्तर आत्मा आनन्दमयः। तेनैष पूर्णः, स वा एष पुरुषविध एव, तस्य पुरुषविधताम्, अन्वयं पुरुषविधः। तस्य प्रियमेव शिरः, मोदो दक्षिणः पक्षः, प्रमोद उत्तर पक्षः, आनन्द आत्मा, ब्रह्म पुच्छं प्रतिष्ठा"। इति।

'आधारभूतस्तरस्य राष्ट्रियपाठ्यचर्यायाः रूपरेखा - २०२३' औपनिषदिकदर्शनस्य पञ्चकोशम् अधिगमस्य पञ्च आयामैः साकं योजयति। एते पञ्च आयामाः अधोलिखिताः सन्ति- शरीर-गत्यात्मकः, समाज-संवेगात्मकः, भाषा-साक्षरता, संस्कृतिः तथा च समाजबोधः। पञ्चकोशविकासस्य प्रक्रियायां मानवस्य व्यक्तित्वस्य पञ्चविधानां कोशविशिष्टानां विकासः निहितः भवति। मानवजीवने व्यक्तित्वनिर्माणस्य प्रक्रियायाः सन्दर्भे एते पञ्चकोशाः अत्यन्तं प्रभावशालिनः भवन्ति।

'आधारभूतस्तरस्य राष्ट्रियपाठ्यचर्यायाः रूपरेखा'यः निर्देशानाम् अनुगुणं निर्मितेषु पाठ्य-पुस्तकेषु सम्प्रति प्रथम-द्वितीय कक्षयोः एव पुस्तकानां निर्माणं जातम्। अवशिष्टानां तृतीयाकक्षातः द्वादशीकक्षायाः पाठ्य-पुस्तकानि अग्रिमे शैक्षणिकसत्रे उपलब्धानि भविष्यन्ति इति परिषदः अधिकारिभिः सूच्यते।[४] पञ्चकोशम् आधृत्य उपर्युक्तकक्षयोः भाषागणितविषययोः पुस्तकानि एव उपलब्धानि सन्ति। येषु एकं पुस्तकं गणितस्य अस्ति। अन्यानि हिन्दीभाषायाः आङ्ग्लभाषायाः उर्दूभाषायाः च पुस्तकानि सन्ति। उभयोः कक्षयोः समेषां पुस्तकानां नामानि समानानि एव सन्ति। गणितस्य पाठ्य-पुस्तकस्य नाम 'आनन्दमय गणित' इति वर्तते। हिन्दीभाषायाः पुस्तकस्य नाम 'सारंगी' इति अस्ति। आङ्ग्लभाषायाः पुस्तकस्य नाम 'मृदङ्ग' तथा च उर्दूभाषायाः पुस्तकस्य नाम 'शहनाई' इति वर्तते। राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणयोर्परिषदः अनुसारम् एतानि पुस्तकानि दक्षताधारितां सामग्रीं सरलां रुचिपूर्णां च विधास्यन्ति।

शिक्षानीतिविषये राष्ट्रियस्तरस्य विचारविमर्शात्परं राज्यानि अपि नवनीतिम् अनुसृत्य भारतीयज्ञानपरम्परां प्रति उन्मुखाः अभवन्। अस्मिन्नेव क्रमे छत्तीसगढ़प्रदेशस्य राज्य-शैक्षिक-अनुसन्धान-प्रशिक्षणयोर्परिषदा (SCERT-CG) अपि उपनिषदां शिक्षादर्शनस्य अनुसरणं कृतम्। तत्रापि तैत्तिरीयोपनिषदः पञ्चकोशात् प्रेरणाम् अवाप्य नूतनानां पाठ्य-पुस्तकानां निर्माणं कृतम्। छत्तीसगढ़शासनस्य शिक्षाविभागस्य अनुसारम् एतेषां पुस्तकानां रचनायां "जादुई पिटारा' इत्यस्य अवधारणा समाहिता अस्ति। अत्र पाठ्यचर्यायाः लक्ष्येण सह पञ्चकोशानां समावेशनस्य कार्यमपि विहितम्। येन छात्राणां जीवनस्य शारीरिकं सामाजिकं भावनात्मकं नैतिकञ्च उन्नयनं भवेत्।

उपनिषदां तर्कः, प्रश्नः संवादश्च इत्यादीनां विधीनाम् अनुगुणम् अधिगमस्य विभिन्नाः युक्तयः अनुसृताः सन्ति। एतेषाम् अतिरिक्तम् अत्र तादृशीनां विषयसामग्रीणां गतिविधीनां च प्राचुर्यम् अपि वर्तते, याः छात्रेषु पर्यावरणं प्रति संवेदनशीलतायाः भावनायाः विकासे अत्यन्तं सहायिकाः भवन्ति।

भारतीयसंस्कृतिः विविधताभि: सम्पन्ना अस्ति। असंख्यका: भाषोपभाषा: शास्त्रीयं नृत्यं सङ्गीतं पारम्परिकलोककलाश्च इमां सांस्कृतिकरूपेण समृद्धां कुर्वन्ति। स्वादिष्टानि व्यञ्जनानि उत्तमवस्त्राभरणादीनि च जीवनस्य प्रत्येकस्मिन् क्षेत्रे भारतीयसंस्कृते: वैविध्यस्य प्रमाणभूतानि सन्ति। एतानि बहुमूल्यानि सांस्कृतिकतत्त्वानि अस्माकं न्यासभूतानि सन्ति। यानि भाविसन्ततिभ्य: अवश्यमेव संरक्षणीयानि। शिक्षाप्रणाल्यां व्यावहारिकप्रयोगेण एतेषां पोषणाय प्रयत्नानि विधातव्यानि। अस्माकं वैदिकसंस्कृतेः समृद्धं रूपम् उपनिषत्सु एव अवलोक्यते। उपनिषदां अध्यात्मदर्शनयोः ज्ञानेन एव तात्कालिकशिक्षाव्यवस्थायाः अभिज्ञानं भवितुं शक्यते। उपनिषत्कालिकसाहित्ये वैज्ञानिकं दार्शनिकं धार्मिकं चिन्तनं द्रष्टुं शक्यते। वर्तमानमिव तस्मिन् समये अपि जीवनस्य लक्ष्याणां पूर्तये शिक्षा महत्साधनत्वेन मन्यते स्म। राष्ट्रियशिक्षानीतौ अपि उक्तमस्ति यत् - **मानवस्य लक्ष्याणां निर्धारणं तात्कालिकानाम् आवश्यकतानाम् आदर्शानाञ्च आधारेण भवति।**

राष्ट्रियपाठ्यचर्यायाः रूपरेखायाः[9] अनुसारं **'भारतस्य शिक्षाया: इतिहासस्य समालोचनेन ज्ञायते यत् प्राचीनभारते शिक्षाया: मुख्यम् उद्देश्यं ज्ञानप्राप्तिः आसीत्'**। औपनिषदिकशिक्षायां ज्ञानं सर्वोच्च-उपलब्धि: मन्यते स्म, यतोहि शिक्षाया: मुख्यम् उद्देश्यम् आध्यात्मिकचेतनाया: विकास:, चरित्रस्य निर्माणम्, मनस: उच्चतमाम् अवस्थां यावत् नैतिकम् उत्थानञ्च आसीत्। तथा चैतस्य उद्देश्यं मानवीय-शिष्टाचारस्य अनुसारं व्यवहार: आसीत्। अत:एव कठोपनिषदि मानवमात्रस्य कृते निम्नोक्तम् आह्वानं कृतम् -

उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।
क्षुरस्य धारा निहिता दुरत्यया दुर्गं पथस्तत् कवयो वदन्ति।।[10]

तैत्तिरीयोपनिषदि आरम्भे एव उल्लिखितम् अधोलिखितं प्रार्थनामन्त्रम् औपनिषदिकशिक्षादर्शनस्य महनीयं स्वरूपम् उपस्थापयति। यस्मिन् गुरु: शिष्यश्च सम्भूय उपविश्य प्रार्थयन्ति यत् -

"ॐ सह नाववतु, सह नौ भुनक्तु, सह वीर्यं करवावहै।
तेजस्वि नावधीतमस्तु, मा विद्विषावहै"।।[11]

इममेव भावम् अङ्गीकृत्य राष्ट्रियशिक्षानीतौ (२०२०) शिक्षकस्य छात्राणां च अन्तस्सम्बन्धस्य संकल्पना विहिता अस्ति। तदुक्तम् - **अस्माकं छात्राणां राष्ट्रस्य च सर्वोत्तमसम्भवभविष्यस्य निर्माणार्थं शिक्षकाणां सशक्तीकरणस्य आवश्यकता अस्ति।**[12]

ऋग्वेदे उक्तमस्ति यत् **"आ नो भद्रा: क्रतवो यन्तु विश्वत: दब्धासो अपरीतासः...”** अर्थात् प्रत्येकं दिशात: आगच्छन्तः, सात्विकाः विचाराः स्वीकर्तव्याः, न केनापि वस्तुना वंचितो भव, सुवचनानि ग्रहीतव्यानि तदैव कल्याणं स्यात्। आधुनिकपरिदृश्ये भारतस्य उपनिषदादिग्रन्थेषु वर्णिताया: प्राचीनज्ञानपरम्पराया: आवश्यकता समस्तमपि विश्वम् अनुभवति। अत एव अस्मिन् विषये अस्माभिः विचारपूर्णं मन्थनं विधातव्यम्। उपनिषदां शिक्षादर्शनस्य अनुसारं मानवेन विद्यया मोक्षप्राप्तिः कर्तव्या। तदुक्तम् -

'विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते’ ॥[13]

राष्ट्रियशिक्षानीतौ (२०२०) अपि प्राचीनभारतीयज्ञानपरम्परायां शिक्षाया: लक्ष्यं निम्नोक्तरूपेण समुल्लखितम् अस्ति यत् - **"ज्ञान, परम्परा और सत्य की खोज को भारतीय विचार परम्परा और दर्शन में सर्वदा सर्वोच्च मानवीय लक्ष्य माना जाता था।"**[14]

निष्कर्ष:

इत्थम् उपर्युक्तविमर्शेण इदं स्पष्टम् अस्ति यत् औपनिषदिकं शिक्षादर्शनं भारतीयसंस्कृतौ महनीयं रत्नमिव प्रतिभाति। उपनिषदः पञ्चकोशानाम् अङ्गीकरणेन राष्ट्रियशिक्षानीतौ अस्य स्पष्ट: प्रभाव: अपि दरीदृश्यते। छात्राणां समक्षम् औपनिषदिकशिक्षायाः अनुगुणं वातावरणम् उपस्थापयितुम् एष: एकः अभिनव: प्रयास: अस्ति। यश्च अवश्यमेव छात्रेभ्य: आनन्दस्य अनुभूतिं कारयेत्। पञ्चकोशम् आधृत्य निर्मितानि एतानि नूतनानि पाठ्य-पुस्तकानि कक्षायां पठने नितान्तमेव सहायकानि भविष्यन्ति। अनेन सहैव परिवारे समुदाये वा सार्थकै: अधिगमसंसाधनै: सह अधिगमस्य महत्त्वं वर्धयन्ति। अपि च छात्राणां व्यावहारिकजीवनेन सह संयोजनस्य प्रयत्नं विधास्यन्ति इति।

---

[1] National curriculum framework: Foundation Stage - 2023 by NCERT.
[2] National Council for Educational Research and Training, New Delhi.
[3] मनुस्मृतिः, 2.6.7.
[4] राष्ट्रियशिक्षानीतिः(2020), परिचयः, पृ.सं. 4.
[5] National curriculum framework: Foundation Stage - 2023 by NCERT.
[6] National Council for Educational Research and Training, New Delhi.
[7] तै.उ., ब्र.व. अनु. १-५
[8] जनसत्ता, ६ जुलाई २०२३
[9] एनसीएफ़-एफ़एस 2023

[10] कठोपनिषदि 1.3.14.
[11] तैत्तिरीयोपनिषदि, 2.2.2
[12] राष्ट्रिय शिक्षा नीति (2020) पृ.सं. 31.

[13] ईशोपनिषद्, 11
[14] राष्ट्रिय शिक्षा नीति (2020), परिचय, पृ.सं. 4.

*****

काव्ये रसस्वरूपमीमांसा

डॉ. नीरजतिवारी
सहयोगी-प्राध्यापकः,
संस्कृतसाहित्यविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊ

प्रस्तावना शोधसारश्च -

काव्यस्य आत्मभूतस्य रसस्य विषयः अतिविस्तारतया लक्षणग्रन्थेषु प्रतिपाद्यते । नाट्यशास्त्रे दशरूपके च रूपकाणां रसानां च विचारः दृश्यते । श्रृङ्गारतिलकं रसतरङ्गिणी इत्यादिग्रन्थाः रससिद्धान्तं प्रतिपादयन्ति। रसः एव काव्यास्वादनार्थः सहृदयानाकर्षयति। रसं विना काव्यं नीरसं भवति । अतः रसः अपि प्रमुखं काव्यतत्त्वं भवति । एवञ्च संस्कृतसाहित्यं द्विधा कथ्यते। लौकिकसाहित्यं वैदिकसाहित्यञ्चेति । वैदिकसाहित्यं नाम चत्वारः वेदाः भवन्ति लौकिकसाहित्ये दृश्यं श्रव्यं च इति भेदद्वयं वर्तते। दृश्यं नाम नाटकादीनि भवन्ति। श्रव्ये गद्यं पद्यं चम्पूरिति भेदत्रयं भवति । एवञ्च दृश्यश्रव्यात्मकानि काव्यानि आनन्दस्यन्दीनि इति । एवं काव्यानि सहृदयानन्दजनकानि वर्तन्ते।रसाः आस्वाद्यमानाः भवन्ति काव्ये। शब्दार्थौ काव्यमिति मम्मटप्रतिपादितं मतम्। एतावेव काव्यस्य शरीरमिति वक्तव्यम्। यथा शरीरस्याधिष्ठातृदेव आत्मा तथैव शब्दार्थरूपकाव्यशरीरस्यापि अधिष्ठातृदेवात्मनो विषये कल्पनन्नासमीचीनम्। -कोऽयमात्मा काव्यशरीरस्येति विषये एकाधिकाः सम्प्रदायाः समुपलभ्यन्ते। एतेषु सम्प्रदायेषु ङ्कारसम्प्रदायःअल, वक्रोक्तिसम्प्रदायः, रीतिसम्प्रदायः, ध्वनिसम्प्रदायः, रमणीयतावादिसम्प्रदायः रससम्प्रदायश्च वैशिष्ट्येन गण्यन्ते। रसालंकाररीतिवक्रोक्तिध्वन्यौचित्यादय: सन्ति। एतेषां प्रवर्तकानां क्रमेण भरतभामहवामनकुन्तकानन्दवर्धनक्षेमेन्द्रादिमतानां संक्षेपेण वर्णनं विधाय तदनन्तरं रसस्वरूपविषये चर्चा एवं रससूत्रस्य चतुर्णामालोचकानां)भट्टलोल्लटशंकुकभट्टनायकाभिनवगुप्तादयदीनां) क्रमशः उत्पत्यनुमितिभुक्त्यभिव्यक्तिवादानां विवेचनम् वर्तते।

कूटशब्दाः –

रसः ,उत्पत्तिः ,निष्पत्तिः ,वादः ,सम्प्रदायः ,संयोगः ,व्यभिचारी ,अनुभावः ,विभावः , अनुमितिः, भुक्तिःकृत्रिमम्। ,नटः ,अभिव्यक्तिः ,

विषयप्रवेशः –

अलङ्कारसम्प्रदायः -

आचार्योदण्डी अलङ्कारसम्प्रदायस्य प्रमुखप्रसारकः। **'काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते'**[1] इत्येतत् प्रतिपाद्य दण्डिना काव्येऽलङ्काराणाम् महत्त्वं प्रदर्शितम् । चन्द्रालोककारेण जयदेवेन तु अलङ्कारविरहे काव्यत्वमेव नाऽङ्गीकृतम् ।[2]

वक्रोक्तिसम्प्रदायः -

वक्रोक्तिसम्प्रदायस्य प्रवर्त्तकः कुन्तकः कुन्तकेन **वक्रोक्तिरेव " "वैदग्ध्यभंगीभणितिरुच्यते**[3] इत्युक्त्वा वक्रोक्तिसम्प्रदायस्य प्रतिष्ठा कृता । अनेनाचार्येण वक्रोक्तिं प्रतिपादयता ध्वन्यलङ्काररसादीनामप्यन्तर्भावो वक्रोक्तावेव घटितः।

रीतिसम्प्रदायः -

रीतिसम्प्रदायस्य व्याख्याता आचार्यो वामनः **'रीतिरात्मा काव्यस्य'**[4] इति प्रतिपाद्याचार्यवामनेन काव्ये प्राथमिकं रीतिमूल्यं स्वीकृतम् । किन्नाम रीतिः? इति समाधानाय **"विशिष्टपदरचनेति"**[5] वामनाचार्येण सम्यक्समाहितम् । अतएव काव्यशोभाकराः धर्मास्तेन गुणा एवोक्ताः ।[6] रीतिसम्प्रदायस्य प्रतिक्रियास्वरूपमेव ध्वनिसम्प्रदायस्य प्रादुर्भावः विद्यते ।

ध्वनिसम्प्रदायः -

ध्वनिसम्प्रदायस्य प्रवर्त्तकः आनन्दवर्धनाचार्यः। काव्यस्यात्मा ध्वनिरित्युक्तत्वाऽऽचार्यानन्दवर्धनेन अभिधाव्यापारस्य खण्डनं विधाय ध्वन्यर्थस्य महिमा प्रदर्शितः । ध्वनिकाव्यमेवाऽनन्दवर्धनेनोत्तमं काव्यमप्युक्तम् । अभिनवगुप्त -विश्वनाथ-मम्मट-प्रभृतयोऽप्याचार्ाः ध्वनिकारस्य मतेन प्रभाविता आसन् इति।

रमणीयतावादिसम्प्रदायः -

[1] . काव्यादर्शः 2.1,3 -

[2] .चन्द्रालोकः 1.8-

[3] . वक्रोक्तिजीवितम् 1.10-

[4] . काव्यालङ्कारसूत्रम् 1.2.6-

[5] . काव्यालङ्कारसूत्रम् 1.2.7-

[6] 3.1.1- काव्यालङ्कारसूत्रम् .

रमणीयार्थप्रतिपादकः शब्दः काव्यमिति सिद्धान्तमाश्रित्य पण्डितराजजगन्नाथेन काव्ये रमणीयार्थ एव प्राणत्वेन स्वीकृतः। केयं रमणीयतेति महाकविमाघेन **'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः'**[7] इत्युक्त्वा रमणीयतायाः सुस्पष्टा परिभाषा प्रदत्ता।

रससम्प्रदायः एवं रसशब्दस्यार्थः स्वरूपञ्च -

रससम्प्रदायस्य प्रवर्त्तको मुनिर्भरतः भरतमुनिना रसशास्त्रस्य शास्त्रीयं विवेचनम् सम्पादितम्। वस्तुतस्तु रसस्य सत्ता शाश्वती। रसानन्दः एव नान्यः। पारमार्थिकं सत्यं ब्रह्म च सच्चिदानन्दस्वरूपमेव कथ्यते। अतः रसोऽपि आत्मैव ब्रह्म वा। श्रीकृष्णेनाप्युक्तम् गीतायाम् - **"रसोऽहमप्सु कौन्तेय"**[8] इत्यपि प्रसिद्धम्। एषा रसस्याऽऽध्यात्मिकी स्थितिः। विश्वनाथ-प्रभृतिभिः रसवादिभिराचार्यैः रसः काव्यस्यात्मा एवोक्तः। यथा शरीरस्याधिष्ठानमात्मनि वर्तते तथैव काव्यशरीरस्याप्यधिष्ठानं रसएव वर्तते। रसं विना काव्यं निर्मूलम्। अतएवाचार्यैः रसस्यात्मता प्रतिपादिता। कैश्चिद्तु **'रसो वै ब्रह्मानन्दसहोदरः'** इत्युक्त्वा रसस्य ब्रह्मानन्देन तुल्यता वर्णिता। अत्रैतद् वैशिष्ट्येन वक्तव्यं यद् रसस्य ब्रह्मानन्दतुल्यतायाः हेतुः रसस्याखण्डताऽद्वैतता च वर्तते। यथाऽऽत्मनि अखण्डत्त्वं द्वैतत्वं च वर्तते तथैव रसानुभूतिरपि अखण्डाद्वैतानुभूतिसहिता च वर्तते। परन्तु अत्रापि ब्रह्मानन्दानुभूतेः रसानुभूतेश्चान्तरोऽपि सुस्पष्ट एवावलोक्यते। ये ब्रह्मानन्दमनुभवन्ति ते **'आत्मविद् आत्मैव भवति,**इति वेदान्तशास्त्रनियमानुसारं सर्वदा प्रपञ्चेनास्पृष्टा एव सन्ति, परं काव्यानन्दस्यास्वादकास्तावत्कालपर्यन्तमेवाखण्डस्याद्वैतस्य च रसस्यास्वादनं कुर्वन्ति, यावत्कालपर्यन्तं रसनिष्पत्तेः साधनानि विभावानुभावव्यभिचार्यादीनि तिष्ठन्ति। श्रव्यकाव्यस्य श्रवणकाले दृश्यकाव्यस्य दर्शनकाले च श्रोतुः द्रष्टुश्च रसानुभूतिः कथ्यते। यदा च न (नाटकस्य) काव्यश्रवणन्नच नाटकदर्शनन्तदा रसानभूतिरपि न दृश्यते। परं ब्रह्मानन्दस्य स्थितिः शाश्वती। एष एव द्वयोरन्तरः प्रतिभाति। कोऽयं रसानुभूतिप्रकारः इतीदानीमालोक्यते।

